BENARES SANSKRIT SERIES;

A
COLLECTION OF SANSKRIT WORKS

EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, PH. D.

No. 94.

बोधसारः ।

श्रीविद्वद्वर्यनरहरिविरचितः ।

तच्छिष्यश्रीदिवाकरकृतयाऽर्थदीप्त्या सहितः ।

श्रीमदुदासीनवर्यस्वामिगोविन्दानन्दशिष्येण
दयानन्दस्वामिना परिशोधितः ।

BODHSÂR,

A TREATISE ON VEDANTA,
BY
SRI NARHARI,
With a commentary by the author's pupil
PANDIT DIVÂKAR.
EDITED BY
SWÂMÎ DAYÂNAND.

Fasciculus III.

BENARES.

Published by the Proprietors Messrs. Braj B. Das & Co.,
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ vilas Press,
BENARES.

1905.

दासोहं भावयन्नेव दाकारं विस्मरत्यसौ ॥ २४ ॥

अन्तरिति। देवभक्तो देवस्य चिन्मात्ररूपिणः परमात्मनो भक्तः सेवको दासोहं भावयन्नेव दासः सेवक एवाहमिति चिन्तयन्सन्नपि तादृशभजनेनैव शुद्धान्तःकरणो यदा यस्मिन्काले ऽन्तर्बुद्ध्यहङ्कारादिसर्ववृत्तिसाक्षितया वृत्तिसन्धिप्रकाशकतया च बहिर्जगत्प्रकाशकतया जगद्गतघटपटादिपदार्थसन्धिप्रकाशकतया च देवं चिन्मात्रैकस्वभावमात्मानं प्रपश्यति साक्षात्करोति तदा तस्मिन्कालेऽसौ भक्तो दाकारं विस्मरति भेदबोधकं दा-इत्येवं पूर्वमक्षरं नानुसन्धत्ते ॥ २४ ॥

दृष्टमेकान्तभक्तेषु नारदप्रमुखेषु तत्।

किंचिद्विशेषं वक्ष्यामि त्वमेकाग्रमनाः शृणु ॥ २५ ॥

दृष्टमिति। एकान्तभक्तेषु अव्यभिचारिभक्तेषु नारदप्रमुखेषु नारदः प्रमुख आद्यो येषां तेषु तद्दाकारविस्मरणं दृष्टमवलोकितमतो ज्ञानभक्त्योरैक्यमेव सिद्धमिति भावः, एवं ज्ञानभक्त्योरैक्यं प्रसाध्य भक्तिश्रद्धाविवृद्धये ज्ञानतो भक्तेराधिक्यं दर्शयितुं किञ्चिद्वैलक्षण्यं दर्शयति सार्द्धाभ्यां किञ्चिदिति, अहं किञ्चित्सूक्ष्मं विशेषं ज्ञानतो भक्तेराधिक्यं वक्ष्यामि कथयिष्यामि तं त्वमेकाग्रमना एकाग्रं स्थिरं मनोन्तःकरणं यस्य स तथाभूतः सञ्छृणु अवधारय ॥ २५ ॥

एवं भक्त्याधिक्यश्रवणे शिष्यमभिमुखीकृत्येदानीं तयोरैक्यनिरूपणपूर्वकं किञ्चिद्वैलक्षण्यं दर्शयति।

यदीश्वररसी भक्तस्तदीश्वररसी बुधः।

उभौ यद्यप्येकरसौ तथापीषद्विलक्षणौ ॥ २६ ॥

यदिति । भक्तो यदीश्वररसी यस्येश्वरस्य रसः सुखं वि-द्यते यस्य स तथोक्तोऽस्ति बुधो ज्ञानी तदीश्वररसी तस्यैवे-श्वरस्य रसः सुखं तद्विद्यते यस्य स तथोक्तोऽस्ति एवं यद्यपि सत्यमित्यर्थः, उभौ भक्तज्ञानिनावेकरसावेकसुखविषयौ स्त-स्तथापीषद्विलक्षणावीषत्स्वल्पं विशेषं लक्षणं चिन्हं ययोस्तौ तथोक्तौ भवतः ॥ २६ ॥

तदेव वैलक्षण्यं दर्शयति ।

बुद्धा बोधरसादन्यरसनीरसतां गताः ।
तथाधिकप्रेमरसान्न तु भक्ताः कदाचन ॥ २७ ॥

बुद्धा इति । यथा बुद्धा ज्ञानिनो बोधरसाद्बोधो ज्ञानं तदेव रसः सुखं 'रसो वै स' इतिश्रुतेः, तस्मादन्यरसनीरसतां गता अन्यो वैषयिको रसः सुखं तस्मिन्नीरसतां वैरस्यं गताः प्राप्तास्तथा तद्वदधिकप्रेमरसादधिको बिम्बरससहित-त्वेन द्विगुणत्वेन प्रतीयमानः प्रेमा तद्रसविषयकस्नेहरूपा वृ-त्तिस्तद्विषयभूतो रसः सुखं तस्माद्धेतोर्भक्ता उपासकाः क-दाचन कस्मिन्नपि काले न तु नैवान्यरसविरसत्वं याता ज्ञा-निनः स्वरूपसुखमात्रं भक्तस्य तु तत्सहितवृत्तिसुखमतो भक्ते सुखाधिक्याज्ज्ञानितो वैशिष्ट्यमिति भावः ॥ २७ ॥

एवं ज्ञानिभक्तयोर्मध्ये भक्ते वैशिष्ट्यं प्रदर्श्येदानीं भक्तेर्ज्ञानं ज्ञानान्मोक्ष इत्येवं व्यवस्थासिद्ध्यै ज्ञानभक्त्योरेकनिष्ठत्वसिद्धेः शास्त्रेषु वसिष्ठादिषु ज्ञानित्वं नारदादिषु तु भक्तत्वं च भिन्नत्वेन कुतः प्रतिपाद्यते तत्र हेतुं ज्ञापयितुं प्रश्नमुत्थापनं प्रतिजानीते ।

अथप्रश्नः ।

अथेति । अथेदानीं प्रश्न उत्थाप्यत इत्यर्थः, तमेवाह सार्धाभ्याम् ।

ननु ज्ञानं विना मुक्तिर्नास्ति युक्तिशतैरपि ।
तथा भक्तिं विना ज्ञानं नास्त्युपायशतैरपि ॥२८॥

नन्विति । ननु इयमत्राशङ्का ज्ञानं विना ज्ञानं जीवब्रह्मै-क्यविषयं महावाक्यजन्यमपरोक्षं विन ऋते युक्तिशतैरपि यु-क्तीनां योगधारणानां शतैः शतसङ्ख्याकैरसङ्ख्ययोगधार-णाभिरित्यर्थः, मुक्तिर्मोक्षो नास्ति न भवति तथा तद्वद्भक्तिं विना प्रेमलक्षणवृत्तिमीश्वरविषयां विन ऋते ज्ञानमात्मबोध उपायशतैरपि उपायानां कर्मोपास्त्यादीनां शतैरपि असङ्ख्ये-योपायैरित्यर्थः, नास्ति न भवतीत्येवं निर्णयः सर्वशास्त्रे-ष्विति भावः ॥ २८ ॥

भक्तेर्ज्ञानं ततो मुक्तिरिति साधारणक्रमः ।
ज्ञानिनस्तु वसिष्ठाद्या भक्ता वै नारदादयः ॥२९॥

भक्तेरिति । भक्तेरीश्वरविषयकप्रेमवृत्तेर्ज्ञानं जीवब्रह्मै-क्यबोधो भवति ततो बोधान्मुक्तिर्मोक्षो भवतीति एवं क्रमो निर्णयः साधारणः सामान्योऽस्ति एवं सत्यपि वसिष्ठाद्यास्तु वसिष्ठ आद्यो मुख्यो येषां ते तथोक्तास्त एव ज्ञानिनो ज्ञान-वन्तो भवन्ति नारदादयो वै नारद आदिर्येषां ते तथोक्तास्त एव भक्ता ईश्वरविषयकप्रेमलक्षणवृत्तिमन्तो भवन्ति ॥ २९ ॥

एवमादिव्यवस्थायाः कारणं किं निरूप्यताम् ।
अत्रोच्यते विचित्रं यत्कारणं तन्निशामय ॥ ३० ॥

एवमिति । एवमादिव्यवस्थाया एवंरूपा याऽऽदिः प्राचीना व्यवस्था मर्यादा तस्याः कारणं बीजं किमस्ति तन्नि-रूप्यतां कथ्यताम्, इदानीं दृष्टान्तसहितोत्तरश्रवणे शिष्यं प्रेरयति

अत्रेति, अत्रास्यां व्यवस्थायां विचित्रं विलक्षणं यद्यादृशं कारणं बीजमस्ति तदुच्यते मया कथ्यते तत्कारणं त्वं निशामय शृणु ॥ ३० ॥

तत्कथनं प्रतिजानीते ।

कथयामि सदृष्टान्तं येनार्थः स्फुटतां व्रजेत् ।
स्यात्तापस्य च पापस्य गंगास्नानेन हि क्षयः ॥३१॥

कथयामीति । अहं सदृष्टान्तं दृष्टान्तेन सहितं यथा तथा तत्कारणं कथयामि निरूपयामि येन निरूपणेनार्थः पृष्टोऽर्थः स्फुटतां प्राकट्यं व्रजेद्गच्छेत्, प्रतिज्ञातार्थनिरूपणे तावद्दृष्टान्तमाह स्यादित्यादित्रिभिः, गङ्गास्नानेन गङ्गाया अवगाहनेन तापस्य शरीरगतौष्ण्यस्य पापस्य च कलुषस्यापि क्षयो नाशः स्याद्भवेद्धीदं सर्वलोकशास्त्रयोः प्रसिद्धमित्यर्थः ॥ ३१ ॥

यस्तु स्यात्तापशान्त्यर्थी तस्यापि स्यादघक्षयः ।
यस्तु स्यादघशान्त्यर्थी तापस्तस्यापि नश्यति ॥३२॥

यस्त्विति । यस्तु योपि तापशान्त्यर्थी ताप उष्णत्वं तस्य शान्तिर्नाशस्तामर्थते प्रार्थयतीति स तथोक्तस्तस्यापि शीतेच्छुपुरुषस्यापि अघक्षयोऽघं पापं तस्य क्षयो नाशः स्याद्भवेद्, यस्तु योपि अघशान्त्यर्थि अघं पापं तस्य शान्तिर्नाशस्तामर्थत इच्छति स तथोक्तः स्याद्भवेत्तस्यापि पापक्षयेच्छुपुरुषस्यापि ताप औष्ण्यं नश्यति नष्टो भवति ॥ ३२ ॥

तापपापक्षयौ स्नानं त्रयमेतत्समं द्वयोः ।
तथाप्येकस्तु शैत्यार्थी शुद्ध्यर्थी तु द्वितीयकः ॥३३॥

तापेति । तापपापक्षयौ तापश्चोष्णत्वं पापं च कलुषं तयोः

क्षयौ नाशौ स्नानं चैतत्त्रयमिदं त्रितयं द्वयोस्तापपापक्षयार्थिनोरुभयोरपि समं तुल्यं भवति यद्यपि यद्यपि तथापि तयोर्मध्य एकस्तु एक एव शैत्यार्थी शीतलत्वार्थीति लोके नाम्नोच्यते द्वितीयकस्तु अन्य एव शुद्ध्यर्थी पापनिवृत्त्यर्थीति नाम्नोच्यत इत्यर्थः ॥ ३३ ॥

यथैव भावभेदेन नामभेदस्तयोरभूत् ।
एवमेव बुधैर्यैस्तु देवो मुक्त्यर्थमाश्रितः ॥ ३४ ॥

यथेति । एवमनेन प्रकारेण यथा यद्वद्भावभेदेन वासनाभिन्नत्वेन द्वयोरुभयोर्नामद्वयमेव द्वे एव नामनी जातं व्यवहार उत्पन्नम्, दार्ष्टान्तिकमाह सार्धत्रिभिरेवमिति, एवमेवैवं प्रकारेणैव बुधैर्विवेकिभिर्यैर्यादृशैर्देवश्चेतनरूपः परमात्मा मुक्त्यर्थं मुक्तीच्छयाऽऽश्रितोऽवलम्बितः ॥ ३४ ॥

भक्त्या ज्ञानमवाप्यैव ये मुक्ता ज्ञानिनो हि ते ।
यैस्तु संसारविरसैर्भक्त्यर्थं हरिराश्रितः ॥ ३५ ॥

भक्त्येति । ते बुधा भक्त्या प्रेमवृत्त्या सद्यैव ज्ञानं जीवब्रह्मैक्यबोधमवाप्य संप्राप्य मुक्ता मोक्षं प्राप्तास्ते ज्ञाने भक्तौ च समाभ्यासवन्तो ज्ञानिनो ज्ञानिनामानो हि प्रसिद्धा लोके शास्त्रे चेत्यर्थः, यैस्तु यैरपि संसारविरसैः संसार ऐहिकपारलौकिकप्रपञ्चे विरसैर्दोषदृष्ट्या विरक्तैर्ज्ञानमोक्षयोरवज्ञानात्तदिच्छाभावेन भक्त्यर्थं केवलं भक्तिरर्थः प्रयोजनं यस्यामाश्रयक्रियायां यथा तथा हरिर्भक्तदुःखहारक आश्रितोऽवलम्बितः ॥३५॥

ततो भक्तिप्रभावेन स्वभावाज्ज्ञानमुद्गतम् ।
तज्ज्ञानं प्राप्य मुक्ता ये ते भक्ता इति वर्णिताः ॥३६॥

तत इति । ततो हरेराश्रयणाद्भक्तिप्रभावेन भक्तेर्भजनस्य प्रभावः प्रतापस्तेन स्वभावाद्रागादिमलनिवृत्त्या स्वस्यात्मनो भावात्सत्तानुभावाज्ज्ञानं जीवब्रह्मणेरैक्यलक्षणमुद्भूतमुत्पन्नं भवतीति शेषः, तज्ज्ञानं तं बोधं प्राप्य लब्ध्वा ये पुरुषा भक्ता इति भक्ता एवं प्रकारेण वर्णिताः कथिताः पुराणादिष्वित्यर्थः ॥ ३६ ॥

उभयोः फलैक्यं दर्शयति ।

विरक्तिभक्तिविज्ञानमुक्तयस्तु समा द्वयोः ।
तथापि भावभेदेन नामभेदस्तयोरभूत् ॥ ३७ ॥

विरक्तीति । द्वयोर्ज्ञानिभक्तयोस्तु अपि विरक्तिभक्तिविज्ञानमुक्तयो विरक्तिश्च वैराग्यं भक्तिश्च प्रेमलक्षणा विज्ञानं जीवब्रह्मैक्यविषयं मुक्तिश्च मोक्ष एता समास्तुल्याः सन्ति तथापि फलसाम्ये सत्यपि तयोर्ज्ञानिभक्तयोर्भावभेदेन भावयोर्भिन्नविषयकवासनयोर्भेदेन भिन्नत्वेन नामभेदो नाम्नोरभिधानयोर्भेदः पृथक्त्वमभूज्जातम् ॥ ३७ ॥

एवं फलैक्ये भक्तज्ञानिनोरैक्यं प्राप्तं तत्प्रकरणविरुद्धत्वान्निवारयितुं ज्ञानतो भक्तेराधिक्यं दर्शयति ।

मुक्तिर्मुख्यफलं ज्ञस्य भक्तिस्तत्साधनत्वतः ।
भक्तस्य भक्तिर्मुख्यैव मुक्तिः स्यादानुषङ्गिकी ॥ ३८ ॥

मुक्तिरिति । ज्ञस्य ज्ञानिनो मुक्तिर्मोक्षो मुख्यफलं मुख्यं प्रधानं च तत्फलं च मुख्यफलमस्ति भक्तिरीश्वरविषयकं प्रेम तत्साधनत्वतस्तस्य मोक्षस्य साधनत्वादेव हेतोर्न मुख्यफलमस्ति भक्तस्योपासकस्य भक्तिरेवेश्वरविषया प्रेमवृत्तिरेव

मुख्या प्रधाना भवति मुक्तिर्मोक्ष आनुषङ्गिकी भक्तिफलरूपेण भक्तिसहचारिणी स्याद्भवेत् ॥ ३८ ॥

रीत्यानयापि सुमते वरिष्ठा भक्तिरीश्वरे ।
अथान्योपि महिमा
परमानन्दरूपोसौ परमात्मा स्वयं हरिः ॥ ३९ ॥

रीत्येति । हे सुमत इदमेव ते सुमतित्वं यद्भक्तिसहचरितज्ञानेन मुक्तिसम्पादनमित्यनेन सम्बोधनेन सूचितम्, अनयोक्तया रीत्या प्रकारेणेश्वरे परमात्मनि भक्तिः प्रेमलक्षणावृत्तिरेव वरिष्ठा श्रेष्ठा, एवं ज्ञानतो भक्तेराधिक्यं प्रतिपाद्येदानीं भक्तेरेव प्रकारान्तरेण महिमानं निरूपयितुं प्रतिजानीते—अथेति, अथ भक्तिश्रैष्ठ्यनिरूपणानन्तरमन्योपि उक्तप्रकाराद्विलक्षणोपीत्यर्थः, महिमा भक्तेर्महत्त्वं निरूप्यत इत्यर्थः, तमेव प्रकारमाह परमानन्दरूप इति, असौ स परमात्मा कार्यकारणातीत आत्माऽत एव परमानन्दरूपः परमो निरतिशयो य आनन्दः सुखं तदेव रूपमाकृतिर्यस्य स तथोक्तोऽत एव हरिः सर्वदुःखहरणशीलः स्वयमात्मापि ॥ ३९ ॥

शिवभक्तिं पुरस्कृत्य भुङ्क्ते भक्तिरसायनम् ।
सनकाद्या वसिष्ठाद्या नन्दिस्कन्दशुकादयः ॥ ४० ॥

शिवभक्तिमिति । शिवस्य कूटस्थस्यात्मनो भक्तिं प्रेमलक्षणां वृत्तिं पुरस्कृत्य ध्वजीकृत्य भक्तिरसायनं सर्वसुखानां बिम्बभूतानन्दविषयत्वाद्भक्तेः रसायनत्वमित्यर्थः, ज्ञानस्य तु परब्रह्मस्वरूपत्वेन परमानन्दरूपत्वे सत्यपि तस्य निर्विषयत्वात्प्रेमलक्षणवृत्तेस्तु वृत्तिविषयकानन्दस्य परमानन्दस्य च सत्वात्सर्ववैषयिकानामपि

तत्रैव सत्वाच्च प्रेमातिशयेन सर्वदुःखतिरोभावेन च केवलसुखसमूहरूपत्वाच्च भक्तौ विष्णोरपि प्रवृत्तिरुचितेत्याशयः, जीवन्मुक्ति सुखादपि भक्तिसुखमधिकमिति सनकादिप्रवृतिनिरूपणेन दृढीकरोति सनकाद्या इति, सनकाद्याः सनक आद्यो मुख्यो येषां सनत्कुमारादीनां ते तथोक्तास्तथा वसिष्ठाद्या वसिष्ठ आद्यो मुख्यो येषां व्यासादीनां ते तथोक्तास्तथा नन्दिस्कन्दशुकादयो नन्दिः शिववाहनभूतो वृषभः स्कन्दो गुहः शुको व्यासपुत्र एत आदयो येषां ते तथोक्ताः ॥ ४० ॥

भुञ्जते तत्पदं प्राप्ता अपि भक्तिरसायनम् ।
द्वैतं विना कथं भक्तिरिति तत्रोत्तरं शृणु ॥ ४१ ॥

भुञ्जत इति । तत्पदं तत्प्रत्यगभिन्नं पदं स्वरूपं प्राप्ता अपि तद्रूपाः सन्तोपि भक्तिरसायनं भक्तिसुखं भुञ्जतेऽनुभवन्ति । ननु भक्तेर्द्वैतामिश्रितत्वे 'नाल्पे सुखमस्ती'ति श्रुत्या विषसंपृक्तान्नस्य विषत्वमिव भक्तेर्दुःखमिश्रितत्वेन दुःखरूपत्वात्कथं सुखरूपत्वं श्रुतिविरुद्धं प्रतिपाद्यत इत्याशङ्कामुद्भाव्योत्तरयति सार्धेन द्वैतमिति, द्वैतं विना भेदमृते भक्तिर्भजनं कथं केन प्रकारेण स्यान्न कथमपीत्यर्थः, इति चेदेवं यदि वदसि तर्हि तत्र प्रश्न उत्तरं प्रत्युत्तरं शृणु अवधारय ॥ ४१ ॥

द्वैतं मोहाय बोधात्प्राक्प्राप्ते बोधे मनीषया ।
भक्त्यर्थं कल्पितं द्वैतमद्वैतादपि सुन्दरम् ॥ ४२ ॥

द्वैतमिति । द्वैतं भेदो बोधात्प्राग्जीवब्रह्मैक्यज्ञानात्पूर्वं मोहयितुं भवति बोधे प्राप्ते जीवात्मैकत्वज्ञाने लब्धे सति मनीषया स्वेच्छया भक्त्यर्थं भक्तिं कर्तुं कल्पितं कल्पनया कृतं द्वैतं

द्वैतं पृथक्त्वमद्वैतादपि सामान्यैकरूपात्सुखादपि सुन्दरमतिसुख-मेवास्ति आनन्दद्वैगुण्यादिति भावः ॥ ४२ ॥

अत्रार्थे भागवतं प्रमाणयति ।

तथा चोक्तं भागवते

तथा चेति । तथा च तथैवेत्यर्थः, भागवते भगवल्लीला-प्रतिपादनप्रधाने शास्त्र उक्तं, तद्वाक्यं पठति ।

'आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥ ४३ ॥

आत्मारामा इति । आत्मारामाश्चात्मनि सच्चिदान-न्दघन आरमन्ते क्रीडन्ति ते तथोक्तास्तथाभूता अपि नि-र्ग्रन्था अत एव ग्रन्थनिरपेक्षा अपि मुनयो मननवन्त उ-रुक्रम उरुर्बहुः क्रमः पादविक्षेपो यस्य तस्मिन्नहैतुकीं फलापे-क्षाहीनां भक्तिं श्रवणकीर्त्तनादिनवलक्षणामन्तःकरणवृत्तिं कुर्वन्ति प्रवर्त्तयन्ति, ननु 'प्रयोजनमनुद्दिश्य न मन्दोपि प्रव-र्त्तते' इति न्यायात्फलापेक्षारहितानां परमानन्दानुभविनां च मुनीनां क्रियारूपायां भक्तौ कथं प्रवृत्तिस्तत्राहेत्थमिति, हरिः समस्तदुःखहारी विष्णुरित्थंभूतगुण इत्थंभूता निरपेक्षत्वेपि पुरुषाणां स्वेषु प्रवर्त्तका गुणा यस्य स तथोक्तोऽस्ति गुणसं-स्कार एव गुणेषु प्रवर्त्तको गुणानां भवतीति भावः ॥ ४३ ॥

उक्तमेव भक्त्यर्थकल्पितद्वैतस्य सुखातिशयरूपत्वं दृष्टा-न्तेन विशदयति ।

जाते समरसानन्दे द्वैतमप्यमृतोपमम् ।
मित्रयोरिव दंपत्योर्जीवात्मपरमात्मनोः ॥ ४४ ॥

जाते इति । समरसानन्दे सम एकरूपो रसः सुखरू-

पत्वं यस्य स चासावानन्दश्च स तथोक्तो जीवब्रह्मणोरैक्यलक्षणो सुख इत्यर्थः, जाते प्राप्ते सत्यपि जीवात्मपरमात्मनोर्जीवस्य परमात्मनश्च यद्भक्त्यर्थं भक्तिं कर्तुं कल्पितं कल्पनयाङ्गीकृतं द्वैतं पृथक्त्वं तदमृतोपमममृतं मुक्तिसुखमेवोपमा तुला यस्य तत्तथाभूतमस्ति तत्र दृष्टान्तो मित्रयोरिति, मित्रयोः परस्परं प्रेमवतोर्दम्पत्योरिव जायापत्योः पृथक्त्वमिवेति ॥ ४४ ॥

दृष्टान्तं विशदयति ।

हृदये वसति प्रीत्या लोकरीत्या च लज्जते ।
यथा चमत्कारमयी नित्यमानन्दिनी वधूः ॥ ४५ ॥

हृदय इति । यथा यद्वद्वधूर्जाया 'वधूर्जाया स्नुषा स्त्री-चे'ति विश्वः, हृदयेन्तःकरणे प्रीत्या पतिप्रेम्णैव वसति तिष्ठति लोकरीत्या च लौकिकव्यवहारेण च लज्जते त्रपते यथा यादृशी चमत्कारमयि आश्चर्यवती नित्यं सर्वदाऽऽनन्दिनी पत्यावानन्दवर्धनशीला भवति एतत्प्रसिद्धं सर्वेष्विति भावः ॥ ४५ ॥

ननु परमानन्दरूपमुक्तिं त्यक्त्वा किं दुःखरूपद्वैतरूपभक्त्येत्याशङ्क्याह ।

पारमार्थिकमद्वैतं द्वैतं भजनहेतवे ।
तादृशी यदि भक्तिश्चेत्सा तु मुक्तिशताधिका ॥ ४६ ॥

पारमार्थिकमिति । अद्वैतं जीवब्रह्मैक्यं पारमार्थिकं तात्त्विकमित्यङ्गीकृत्य द्वैतं पृथक्त्वं भजनहेतवे भजननिमित्तमङ्गीकरोति गुरुशिष्यादिरूपं द्वैतमङ्गीकरोतीत्यर्थः, यद्वा भजनं भक्तिस्तदेव हेतुः फलं तदर्थं द्वैतं गुरुशिष्यादिद्वारा श्रवणमननादिरूपं सेव्यसेवकादिरूपं चाङ्गीकरोतीत्यर्थः, तादृशि एवं

रूपा भक्तिर्भजनं चेद्यदि अङ्गीकृता तर्हि सा भक्तिस्तादृशी उक्तलक्षणा मुक्तिशताधिका मुक्तीनां शतं मुक्तिशतं तस्मादप्यधिकोत्कृष्टा ॥ ४६ ॥

पुनर्भक्तेराधिक्यप्रतिपादनाय भक्तिज्ञानयोरेकफलत्वप्रतिपादनाय च वृत्तमाह ।

प्रियतमहृदये वा खेलतु प्रेमरीत्या
पदयुगपरिचर्यां प्रेयसी वा विधत्ताम् ।
विहरतु विदितार्थो निर्विकल्पे समाधौ
ननु भजनविधौ वा तद्द्वयं तुल्यमेव ॥ ४७ ॥

प्रियतमेति । प्रेयसी प्रियतरा स्त्री प्रियतमहृदयेऽतिप्रीतिविषयः प्रियतमस्तस्य हृदये वक्षसि वेति पक्षे प्रेमरीत्या प्रेमप्रकारेण खेलतु क्रीडतु इत्येकः पक्षः, वाऽथवा पदयुगपरिचर्यां पदयोरङ्घ्र्योर्युगं युग्मं तस्य परिचर्यां सेवां विधत्तां क्रियतामुभयत्र सुखं तुल्यमिति भावः, यथा यद्वत्तथा विदितार्थो ज्ञाततत्त्वो निर्विकल्पे विकल्पा नामरूपजात्यादयस्ते निर्गता निवृत्ता यस्मात्तस्मिन्समाधौ समं ब्रह्माधीयते लक्ष्यतेऽस्मिन्निति समाधिस्तस्मिन्विहरतु क्रीडतु वेत्येकः पक्षः, अथवा भजनविधौ भक्तिप्रकारे विहरतु क्रीडतु तद्द्वयं तदुभयमपि तुल्यमेवैकमेवास्ति ननु निश्चय इत्यर्थः ॥ ४७ ॥

एवमुभयोः साम्यं प्रतिपाद्येदानीं प्रकरणविषयत्वाद्भक्तेः श्रैष्ठ्यं सदृष्टान्तमाह ।

विश्वेश्वरस्तु सुधिया गलितेपि भेदे
भावेन भक्तिसहितेन समर्चनीयः ।

प्राणेश्वरश्चतुरया मिलितेपि चित्ते
चैलाञ्चलव्यवहितेन निरीक्षणीयः ॥ ४८ ॥

विश्वेश्वर इति । सुधिया तु शोभना रागादिरहिता धीर्मतिर्यस्य स तथोक्तस्तेनापि भेदे सेव्यसेवकादिलक्षणे पृथक्त्वे गलितेपि निवृत्ते सत्यपि भक्तिसहितेन श्रवणादिनवलक्षणलक्षितयान्तकरणवृत्त्या सहितेन भावेन प्रेम्णा विश्वेश्वरो जगदीश्वरः परमात्मा समर्चनीयः पूज्यः, तत्र दृष्टान्तः प्राणेश्वर इति, चतुरया बुद्धिमत्या स्त्रिया चित्तेन्तःकरणे मिलितेपि एकीभूते सत्यपि चैलाञ्चलव्यवहितेन चैलमूर्ध्ववस्त्रं तस्याञ्चलमंशस्तेनान्तरितं तेन चक्षुषेति शेषः, प्राणेश्वरः पतिर्निरीक्षणीयः प्रेक्षणीयोऽन्यथा सुखं न स्याद्यथा तथा श्रवणादिभक्तिं विनापि केवलसमाधौ सुखं न स्यादिति भावः ॥ ४८ ॥

उक्ते भक्तिश्रैष्ठ्ये वृद्धवाक्यं प्रमाणयितुमाह ।

अथ भक्तिरसमाश्रित्य श्लोकः ।

अथेति । अथात्रेत्यर्थः, भक्तिरसमाश्रित्य भक्तिसुखमवलम्ब्य श्लोकः श्लोकावित्यर्थः, जातित्वादेकवचनमस्ति तमेवोदाहरति ।

योगे नास्ति गतिर्न निर्गुणविधौ सम्भावनादुर्गमे
नित्यं नीरसया धिया परिहृते द्वे ऐहिकामुष्मिके ।
गोपः कोपि सखाकृतः स तु पुनर्नानाङ्गनासङ्गवा-
नस्माकं पदमर्थयन्ति मुनयश्चित्रं किमस्मात्परम् ॥ ४९ ॥

योग इति । अष्टाङ्गसहिते योगे चित्तनिरोधाख्ये समाधौ मम गतिः प्रचारो नास्ति न विद्यते किञ्च सम्भावनादुर्गमे सम्भावनाया निश्चयवृत्तेर्दुर्गमोऽप्राप्तिर्यस्मिन्, यद्वा सम्भा-

वनया दुर्गमे दुष्प्रापे निर्गुणविधौ निर्गुणं गुणरहितं ब्रह्म वि-धीयते निर्धीयतेऽस्मिन्निति तथाभूते वेदान्त इत्यर्थः, गतिः प्र-चारो नास्ति तर्हि वैषयिके सुखे एव प्रचारोस्तु तत्राह नित्यं सर्वदा नीरसयोदासीनया धिया बुद्ध्यैहिकामुष्मिके इह लोके भवमैहिकं स्रक्चन्दनवनितादिविषयजं सुखमामुष्मिकं चामृतभोगादिविषयजन्यं पारलौकिकं सुखं च ते द्वे उभे अपि परिहृते त्यक्ते अतो नात्र मनसो रमणमिति भावः, पुनः पश्चादन्यदेव विचार्य मया कृतं किं तदित्यत आह गोप इति, मया कोपि अनिर्वचनीयो गोपो गोपालो ग्रामीण इत्यर्थः, स तु सोपि नानाङ्गनासङ्गवान्नानाऽनन्ताश्च ता अङ्गनाः स्त्रियश्च तासां सङ्गः सम्भोगोस्यास्तीति तथाभूतः स सखा मित्रं कृतः आश्रितो मित्रत्वेनाश्रित इत्यर्थः, ननु गोपालसङ्गत्या बुद्धिभ्रं-शेनाधः पात एव स्यात्तत्र किं पुनर्वक्तव्यं नानाङ्गनासङ्गवद्गो-पालसङ्गेनाधः पात इतिशङ्कायामाहास्माकमिति, मुनयो मन-नवन्तोपि अस्माकं तादृशगोपालसङ्गवतां न पदं प्रेमानन्दस्थि-तिरूपमधिकारमित्यर्थः, अर्थयन्ति प्रार्थयन्तीत्यर्थः, अतोस्मा-त्परमेतदाश्चर्यादन्यदाश्चर्यं श्रेष्ठं किं न किमपीत्यर्थः, इदमेवा-तिश्रेष्ठमाश्चर्यमिति भावः ॥ ४९ ॥

आश्चर्यान्तरमाह ।

रोमाञ्चेन चमत्कृता तनुरियं भक्त्या मनो नन्दितं
प्रेमाश्रूणि विभूषयन्ति वदनं कण्ठं गिरो गद्गदाः ।
नास्माकं क्षणमात्रमप्यवसरः कृष्णार्चनं कुर्वतां
मुक्तिर्द्वारि चतुर्विधापि किमियं दास्याय लोलायते ॥ ५० ॥

रोमाञ्चेति । कृष्णार्चनं कृष्णस्य भूमानन्दरूपस्यार्चनं

ध्यानरूपं बाह्यमपि साकारस्य पूजनं कुर्वतामस्माकं नः ।

'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्मकृष्ण इत्यभिधीयते' ॥

इति प्रभृतिवचनैः कृष्णशब्दार्थस्य भूमानन्दत्वेन प्रतिपादनादियमेषा तनुर्देहयष्टी रोमाञ्चेन रोम्णां बालानामञ्चः पुलकस्तेन चमत्कृता चमत्कारवती दृश्यत इति शेषः, मनश्चान्तःकरणं भक्त्या प्रेमलक्षणया वृत्त्याऽऽनन्दितमानन्देन समृद्धं प्रेमाश्रूणि स्नेहाऽऽविर्भूतानि अश्रूणि नेत्रजलानि वदनं मुखं विभूषयन्ति अलंकुर्वन्ति गद्गदाऽव्यक्ताक्षरा गिरो वाण्यः कण्ठं गलमवरोधयन्तीति शेषः, एवंलक्षणवतामस्माकं क्षणमात्रमपि क्षणमात्रं तावन्मात्रमपि अवसरः समयोऽन्यविषयमङ्गीकर्त्तुं न न विद्यते तथापि चतुर्विधापि सायुज्यसार्ष्टिसामीप्यसारूप्यभेदेन चतुःप्रकारापि मुक्तिर्मोक्षो द्वारि पारिमार्थिकजीवब्रह्मैक्यलक्षणमोक्षद्वारभूते भजने दास्याय दास्यं कर्त्तुं लोलायते लोला चञ्चलेवाचरति अतश्चतुर्विधा मुक्तिः प्रपञ्चनिवृत्तिः किं न किमपि अति तुच्छेत्यर्थः ॥ ५० ॥

उक्तश्लोकौ मधुसूदनकृतावुदाहृतौ स्वश्लोकेनापि भक्त्याधिक्यप्रतिपादकेनाश्चर्यान्तरमाह ।

घनः कामोऽस्माकं तव तु भजनेऽन्यत्र नरुचि-
स्तवैवांघ्रिद्वन्द्वे नतिषु रतिरस्माकमतुला ।
सकामे निष्कामा सपदि तु सकामा पदगता
सकामास्मान्मुक्तिर्भजति महिमायं तव हरे ॥ ५१ ॥

इति श्रीनरहरिविरचिते बोधसारे भक्तिरसायनम् ॥ १३ ॥

घन इति । तव तु तवैव नान्यस्येत्यर्थः, भजने भक्तावस्माकं त्वद्भक्तिरुचिमतां नो घनो गाढः काम इच्छाऽस्ति

अन्यत्र कर्मणि ज्ञाने वाऽन्यभजने वापि रुचिः प्रीतिर्न नास्ति कुत इत्यत आह तवेति, तवैव त एव केवलमङ्घ्रिद्वन्द्वेऽङ्घ्र्योः पादयोर्द्वन्द्वं युग्मं तस्मिंस्तद्विषयिणीष्वित्यर्थः, नतिषु प्रणामेषु अस्माकं त्वद्भक्तानां रतिः प्रीतिरतुला न विद्यते तुलोपमा यस्याः सा तथाभूताऽस्ति यतोऽत इत्यर्थः, किञ्च सकामे विषयेच्छावति पुरुषे निष्कामेच्छारहिता तु अपि यद्वा तु प्रसिद्धेत्यर्थः, सकामा कामवती भूत्वेति शेषः, मुक्तिः सायुज्य-सार्ष्टिसामीप्यसारूप्यरूपा सपदि शीघ्रं पदगता पदयोश्चरणयो-र्गता लग्ना सती सकामास्मान्कामसहितान्नो भजति सेवते हे हरे हे सर्वदुःखनिरासक अयमेष महिमा महत्वं तव तेऽस्ति ॥९१॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ भक्तिरसायनार्थप्रकाशस्त्रयोदशः ॥ १३ ॥

अथ राजयोगे भूमिकाभेदभास्करः।

एवं सर्वसाधनानि प्रतिपाद्येदानीमेतैः साधनैः साध्या-मवस्थां निरूपयितुमुत्तरग्रन्थारम्भः, तत्र च फलरूपां तामवावस्थां भूमिकाभेदेन निरूपयितुं भूमिकाभेदभास्कराख्यं प्रकरणं सार्ध-चतुःषष्ट्युत्तरशतश्लोकमारभते, तत्र च त्याज्यग्राह्यभेदेन भूमि-काश्चतुर्दश प्रतिपादयितुं प्रकरणद्वयमस्ति, तत्रादौ त्याज्यसप्त-भूमीस्त्याजयितुं तज्ज्ञानार्थमज्ञानभूमिका निर्णेतुमज्ञानभूमिकानि-र्णयाख्यं पादोनचतुर्दशश्लोकं प्रकरणमारभते, तत्राप्यादौ ता-वदुत्तरग्रन्थ इत ऊर्ध्वं राजयोगनिरूपणं प्रतिजानीते।

भूमिकाभेदमारभ्य यावद्ग्रन्थसमापनम्।
अगाधबोधसारेऽस्मिन्राजयोगो निरूप्यते ॥ १ ॥

भूमिकाभेदमिति। भूमिकाभेदं भूमिकानां चतुर्दशभूमीनां भेदं भेदानरूपकप्रकरणमारभ्यारम्भं कृत्वा ग्रन्थसमापनं यावद्ग्रन्थस्य बोधसाराख्यग्रन्थस्य समापनं समाप्तिर्यावद्ग्रन्थसमाप्तिपर्यन्तमित्यर्थः। अस्मिन्प्रकृतेऽगाधबोधसारेऽगाधो दुरवगाहोऽनुभवं विनाऽर्थतो दुरवगाह इत्यर्थः, स चासौ बोधसारश्चैतन्नामको ग्रन्थस्तस्मिन्राजयोगो राज्ञां नृपाणां स्वस्थाने स्थित्वापि साधयितुं शक्यत्वात्तत्सम्बन्धी योगो जीवब्रह्मैक्यविषयकज्ञानलक्षणो निरूप्यते प्रतिपाद्यते ॥ १ ॥

एवमुत्तरग्रन्थार्थनिरूपणं प्रतिज्ञायेदानीं प्रकरणार्थं श्रोतुं फलप्रदर्शनेन शिष्यं प्रेरयति।

अथायं हृदि कर्तव्यो भूमिकाभेदभास्करः।
यस्य प्रसादमात्रेण तमो हार्दं विलीयते ॥ २ ॥

अथेति। अथ साधनश्रवणानन्तरमयं प्रत्यक्षो निरूप्यमाणो भूमिकाभेदभास्करो भूमिकानामवस्थानां निरूपयिष्यमाणानां चतुर्दशसंख्यानां भेदः परस्परवैलक्षण्येन पार्थक्यं तस्य भास्करः सूर्य इव प्रकाशको ग्रन्थो हृदि अन्तःकरणे कर्तव्योऽवधार्यः, नन्वेतदवधारणे किं फलं तत्राह यस्येति, यस्य भूमिकाभेदभास्करस्य प्रसादमात्रेण प्रसन्नतयैव केवलं हार्दं हृदि भवमन्तःकरण उत्पन्नं तमोऽज्ञानलक्षणमान्ध्यं विलीयते नश्यति ॥ २ ॥

एवं प्रकरणार्थविचारस्य फलं प्रदर्श्येदानीं प्रकरणप्रतिपाद्यसर्वभूमिकासंख्यामाह।

अज्ञानभूमिकाः सप्त सप्तैव ज्ञानभूमिकाः।
बीजजाग्रत्तथा जाग्रन्महाजाग्रत्तथैव च ॥ ३ ॥

अज्ञानेति। अज्ञानभूमिका अज्ञानस्य मोहस्य भूमिका

अवस्थाः सप्त सप्तसङ्ख्याः सन्ति, ज्ञानभूमिका एवाज्ञाननिर्वर्त्तकस्य विवेकस्य भूमिका अवस्था अपि सप्त सप्तसङ्ख्याः सन्ति, एवं भूमिकासङ्ख्यां प्रदर्श्य त्याज्यत्वेनाज्ञानभूमिकाज्ञानार्थं प्रथममज्ञानभूमिकाः सप्त नामभेदेन निर्दिशति बीजजाग्रदिति, बीजजाग्रद्बीजजाग्रन्नाम्न्येका, तथा तद्वज्जाग्रज्जाग्रन्नाम्नी द्वितीया, तथैव च तद्वदेव महाजाग्रदेतन्नाम्नी तृतीया, ।

जाग्रत्स्वप्नस्तथा स्वप्नः स्वप्नजाग्रत्सुषुप्तकम् ।
इति सप्तविधो मोहस्तेषां विवरणं शृणु ॥ ४ ॥

तथा जाग्रत्स्वप्नो जाग्रत्स्वप्ननाम्नी चतुर्थी, तथा तद्वत्स्वप्ननाम्नी पञ्चमी, तथा स्वप्नजाग्रन्नाम्नी षष्ठी, तथा सुषुप्तकं सुषुप्तिनाम्नी सप्तमी, सर्वसंख्यामाहेतीति, एवं प्रकारेण मोहोऽज्ञानं सप्तविधः सप्तप्रकारोऽस्ति, तासां भेदज्ञानाय ता निरूपयितुं तच्छ्रवणे शिष्यं प्रेरयति तेषामिति, तेषां सप्तविधमोहानां विवरणं विस्तरं शृणु अवधारय ॥ ३ ४ ॥

तासु प्रथमां लक्षयति सार्धेन ।

कुसूले संस्थितं बीजं तत्र सर्वो यथा द्रुमः ।
तथा यत्र स्थितं विश्वं न तु व्यक्तिमुपागतम् ॥ ५ ॥
बीजरूपं स्थितं जाग्रद्बीजजाग्रत्तदुच्यते ।
संसारप्रथमावस्था महामोहः स एव हि ॥ ६ ॥

कुसूल इति । कुसूले धान्यसञ्चयार्थं मृदादिना निर्मिते पात्रे संस्थितं पूर्वं स्थापितं बीजं चणकादिधान्यानां कारणभूतं धान्यमस्ति तत्र बीजे सर्वः शाखाकाण्डपुष्पफलोपेतो द्रुमो वृक्षो यथा यद्वदस्ति तथा तद्वद्यत्र मायाशबले ब्रह्मणि

विश्वं जगत्स्थितमस्ति व्यक्तिं प्रकटतां न तु नैवोपागतं प्राप्तं तदेव जगज्जाग्रच्छब्दवाच्यं बीजरूपत्वाद्बीजमिव जगत्कारणं मायाशबलं ब्रह्म तदेव रूपं यस्य तत्तथाभूतं स्थितं तिष्ठति तत्कारणमेव बीजजाग्रदेतन्नामकमुच्यते कथ्यते मुनिभिरिति शेषः, तस्यैव ग्रन्थान्तरे नामान्तराणि सन्ति तान्याह संसारेत्यादिना, संसारप्रथमावस्था संसारस्य ब्रह्माण्डस्य प्रथमा गर्भस्थिति रूपाऽवस्था स्थितिरिति सैवोच्यते स एव हि उक्तलक्षण एव हि प्रसिद्धो महामोहो मूलाज्ञानमिति नामान्तरैरुच्यते ॥ ५६ ॥

तदेवाज्ञानमित्युक्तं यत्स्वबोधेन लीयते ।
कुसूले संस्थितं बीजं क्षेत्रे निक्षिप्यते यदा ॥७॥

तदेव बीजजाग्रदेवाज्ञानं ज्ञानविरोधि भावरूपमिति एवं नाम्नोक्तं कथितं वेदान्तेष्वित्यर्थः । कुत इत्यत आह यदिति, यद्यस्मात्कारणात्स्वबोधेन स्वस्याज्ञानस्य बोधो ज्ञानं तेन, यद्वा स्वस्यात्मनो बोधो ज्ञानं तेनेत्यर्थः, लीयते नश्यतीत्यत इत्यर्थः, द्वितीयां सदृष्टान्तां लक्षयति कुसूल इति सार्धाभ्यां, कुसूले धान्यसञ्चयनार्थं मृदादिना निर्मिते पात्रे संस्थितं पूर्वं संस्थापितं बीजं चणकादिकारणभूतं चणकादि यदा यस्मिन्काले क्षेत्रे भूमौ निक्षिप्यत उप्यते ॥ ७ ॥

तदेत्यध्याहार्यं, तदा तस्मिन्न् काले ।

अंकुरोन्मुखतां याति सावस्था जाग्रदुच्यते ।
इदमेव महत्तत्त्वमिति सांख्यैर्निरूप्यते ॥ ८ ॥

अङ्कुरोन्मुखतां किञ्चिदङ्कुरोत्पत्त्या वृक्षजनने सन्मुखतां याति प्राप्नोति तस्यावस्थेवावस्थानं या सा जाग्रन्नाम्नोच्यते

कथ्यते तस्या एतस्या अपि शास्त्रान्तरे नामान्तराणि सन्ति तान्याहेदमित्यादिसार्धेन, इदमेवेयमवस्थैव सांख्यैः सांख्यशास्त्रविद्भिर्महत्तत्त्वमिति एवं नाम्ना निरूप्यते प्रतिपाद्यते॥८॥

ईक्षणं चेति वेदान्तैः सामान्याहङ्कृतिस्तथा।
आनन्दमयकोशश्च तत्साक्षी त्वीश्वरः स्मृतः॥९॥

तथा तद्वद्वेदान्तैरुपनिषद्वाक्यैः 'स ईक्षते'त्यादिभिरीक्षणं चेक्षणमवलोकनमिति नाम्नेदमेव प्रतिपाद्यते तथा तद्वत्सामान्याहङ्कृतिः समष्ट्यहङ्कार इति आनन्दमयकोशश्चेति च तैरेव वेदान्तिभिरभिधीयते तत्साक्षी तु तस्या जाग्रतः साक्ष्यव्यवधानेन प्रकाशकस्तद्विलक्षणश्चेश्वर इति स्मृत उक्तः॥८९॥

तृतीयां लक्षयति त्रिभिः पादैः।

विशेषाहङ्कृतिः सूक्ष्माङ्कुरवद्व्यावहारिकी।
महाजाग्रद्बुधैः प्रोक्ता व्यष्ट्यवस्थात्रये तु सा॥१०॥

जाग्रत्स्वप्नसुषुप्ताख्येवस्था जाग्रदिति स्मृता।
जाग्रदेव यदा जीवो मनोराज्यं करोति हि॥११॥

विशेषेति। सूक्ष्माङ्कुरवद्यवादिधान्यानां परिचितिकारणं यद्वत्तद्व्यावहारिकी व्यवहारे भवा विशेषाहङ्कृतिर्विशेषा सुख्यहं दुःख्यहं काणोहं बधिरोहं पुष्टोहं कृशोहं ब्राह्मणोहं क्षत्रियोहमित्यादिरूपाहङ्कृतिरहङ्क्रिया सा बुधैर्विवेकिभिर्महाजाग्रदेतन्नाम्ना प्रोक्ता कथिता, अस्या एव नामान्तरं व्यावहारिकमाह व्यष्टीति. सा तु सैव जाग्रत्स्वप्नसुषुप्त्याख्ये जाग्रच्चेन्द्रियैरर्थोपलब्धिर्जागरितमित्युक्तलक्षणा, स्वप्नश्चेन्द्रियाणां कारणात्मनावस्थाने जाग्रत्संस्कारजः प्रत्ययवान्स्वप्न इत्युक्त

लक्षणः, सुषुप्तिश्चाज्ञानमात्रस्थितिरूपा, एता आख्या आद्या यस्य तस्मिन्व्यष्ट्यवस्थात्रये व्यस्तरूपबुद्धेरवस्था जाग्रत्स्वप्नसुषुप्तयस्तासां त्रयं तस्मिञ्जाग्रदिति नाम्ना स्मृता प्रोक्ता मुनिभिरिति शेषः, चतुर्थीं लक्षयति जाग्रदेवेति, जीवः साधिष्ठानबुद्धिस्थश्चिदाभासो यदा यस्मिन्काले जाग्रदेव जाग्रत्सन्नपि मनोराज्यं मानसं संसारं करोति संकल्पयति हि प्रसिद्धमेतत्सर्वेषामित्यर्थः ॥ १० ॥ ११ ॥

जाग्रतः स्वप्न इव यत्स जाग्रत्स्वप्न उच्यते ।
लोकप्रसिद्धो यः स्वप्नः स स्वप्न इति कथ्यते ॥ १२ ॥

जाग्रत इति । जाग्रतो जागरणवतः स्वप्न इव स्वप्नवद्यन्मनोराज्यं स जाग्रत्स्वप्नो जाग्रत्स्वप्ननाम्न्यवस्थोच्यते कथ्यते, पञ्चमीमाह लोकप्रसिद्ध इति, यो लोकप्रसिद्ध आगोपालं सर्वैरनुभूतः स्वप्नोऽस्ति स स एव स्वप्ननाम्नी कथ्यते निरूप्यते ॥ १२ ॥

षष्ठीं लक्षयति ।

जातेपि जागरे जन्तोः स्वप्नदृष्टार्थभासनम् ।
प्रत्यक्षमिव संस्कारात्स्वप्नजाग्रत्तदुच्यते ॥ १३ ॥

जातेपीति। जन्तोर्जीवस्य जागरे जागरणे जातेपि उत्पन्नेपि सति संस्कारात्साप्नार्थानुभवसंस्कारात्प्रत्यक्षमिव जाग्रद्दृग्गोचराभावेनाप्रत्यक्षमपि प्रत्यक्षवत्स्मृतिविषयं स्वप्नदृष्टार्थभासनं स्वप्ने ये दृष्टा अर्था गिरिनदीनगरादयस्तेषां भासनं प्रतीतिस्तद्भासनं स्वप्नजाग्रदेतन्नाम्न्यवस्थोच्यते कथ्यते ॥ १३ ॥

सप्तमीं लक्षयति।

षडवस्थापरित्यागे सुषुप्तिः सप्तमी मता।
अज्ञानभूमिकास्त्वेताः शृणु विज्ञानभूमिका ॥ १४॥

इति श्रीनरहरिकृतौ बो० भूमिकाभेदभास्करेऽज्ञानभूमिनिर्णयः।

षडिति। षडवस्थापरित्यागे षण्णामुक्तलक्षणानां जाग्रदाद्यवस्थानां परित्यागेऽभावे सति या सुषुप्तिर्निद्रा सा सप्तमी सप्तम्यवस्था मतोक्ता मुनिभिरिति शेषः, उक्तमज्ञानभूमिकानिरूपणमुपसंहरति अज्ञानेति, हे शिष्य एता निरूपिता अज्ञानभूमिका अज्ञानस्य महामोहस्य भूमिका अवस्था उक्ता इति शेषः, एवं सलक्षणा अज्ञानभूमिकाः प्रतिपाद्येदानीं ज्ञानभूमिकाः श्रोतुं शिष्यं प्रेरयति शृण्विति, विज्ञानभूमिका विज्ञानस्य विवेकस्य भूमिका अवस्थाः पूर्वं सप्त निर्दिष्टास्ता इदानीं त्वं शृणु अवधारय ॥ १४ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ भूमिकाभेदभास्करार्थप्रकाशेऽज्ञानभूमिकानिर्णयार्थप्रकाशः प्रथमः ॥ १ ॥

अथ ज्ञानभूमिका।

एवं अज्ञानभूमिकाः सलक्षणाः सप्त निरूप्येदानीं ज्ञानभूमिकाः प्रतिपादयितुं ज्ञानभूमिनिर्णयाख्यं प्रकरणमेकोनसार्धशतश्लोकमारभते, तत्र चावान्तरप्रकरणानि प्रथमभूमिका द्वितीयभूमिका तृतीयभूमिका चतुर्थभूमिका पञ्चमभूमिका षष्ठभूमिकासप्तमभूमिकानिर्णयाख्यानि सप्तभूमिकाशास्त्रार्थनिर्णयाख्यं चेत्यष्टौ क्रमेणैकोनत्रिंशच्चतुस्त्रिंशदेकादशाष्टादशद्वाविंशतिनवनवसप्तदशश्लोकानि सन्ति तत्रादौ प्रथमभूमिकानिर्णयाख्यमेकोनत्रिंश-

श्लोकं प्रकरणमारभते, तत्र च तावन्निरूप्यमाणभूमिकानामान्याह।

जिज्ञासाथ विचाराख्या ततस्तु तनुमानसा।
सत्त्वापत्तिरसंसक्तिः पदार्थाभाविनी तथा ॥ १ ॥
सप्तमी तुर्यमित्युक्ता तुर्यातीतमतः परम्।

जिज्ञासेत्यादिसार्धेन। जिज्ञासा ज्ञातुमात्मनस्तात्त्विकं रूपमिच्छेति जिज्ञासानाम्न्येका, अथानन्तरं विचाराख्या विचारो विवेकः प्रकृतिपुरुषात्मानात्मादीनां सैवाख्या यस्याः सा तथोक्तनाम्नी द्वितीया, ततस्तु द्वितीयभूमिकानन्तरं तु ताभ्यां विलक्षणा तनुमानसा तनवः सूक्ष्मा मानसा मनोविकाराः कामाद्यो यस्यां सा तथोक्तैतन्नाम्नी तृतीया, ततोनन्तरं सत्त्वापत्तिः सत्त्वस्य सत्त्वगुणस्यापत्तिः प्राप्तिर्यस्यां सा तथोक्ता यद्वाऽन्यासत्त्वदृष्ट्यात्मनः स्वस्य कालत्रयाबाधितस्याप्तिः प्राप्तिर्यस्यां सा तथोक्ता चतुर्थी ज्ञेया, ततोनन्तरमसंसक्तिर्न विद्यते संसक्तिः केनापि सम्बन्धप्रतीतिः स्वस्मिन्यस्यां सैतन्नाम्नी पञ्चमी ज्ञेया, तथा तद्वत्पदार्थाभाविनी पदानि जीवेश्वरादिनामानि अर्थास्तद्रूप्यानि रूपाणि तेषामभावोऽसत्त्वं विद्यते यस्यां सा पदार्थाभाविनी षष्ठी नाम्ना ज्ञेया, तुर्यमित्युक्ता तुर्यमित्येवं नाम्नोक्ता मुनिभिः कथिता सा सप्तमी ज्ञेया, अतः परं सप्तमभूम्यस्पृष्टं तुर्यातीतमेतन्नाम तत्त्वमस्ति ॥ १ ॥

आसां भूमिकानां ग्रन्थान्तरे नामभेददर्शनेन भ्रमो माभूदिति नामान्तराण्यपि वक्तुं प्रतिजानीते।

आसामत्र नामान्तराणि।

आसामिति। आसामेवोक्तनाम्नीनां भूमीनां नामान्त-

राणि अन्यानि नामानि उच्यन्त इति शेषः, तान्येवाह ।

सुमुक्षा च समक्षा च परीक्षा च परोक्षका॥ २ ॥

मुमुक्षेति । मुमुक्षा मोक्तुं संसारबन्धनादिच्छा मुमुक्षा प्रथमा भूमिका ज्ञेया, च पुनः समक्षा सम्यगक्षं समीचीनं विचाररूपं नेत्रं यस्यां सा तथोक्ता द्वितीया, च पुनः परीक्षा परीक्षणं परीक्षा मननं तदस्यामस्तीति सा तथोक्ता तृतीया, च पुनः परोक्षका परोक्षं परोक्षतया ज्ञातं कं ब्रह्म यस्यां सा तथोक्ता चतुर्थी ज्ञेया ॥ २ ॥

अपरोक्षा महादीक्षा पराकक्षेति सप्त ताः ।

प्रथमा त्वधिकाराख्या द्वितीया श्रवणात्मिका ॥ ३ ॥

अपरोक्षेति । अपरोक्षा न परोक्षं ब्रह्म यस्यां सा तथोक्ता ब्रह्मसाक्षात्कारवतीत्यर्थः, पञ्चमी; महादीक्षा महत्यनवच्छिन्ना दीक्षाऽहं ब्रह्मेति दीक्षणं संस्कारविशेषो यस्यां सा तथोक्ता षष्ठी ज्ञेया, तथा पराकक्षा परोत्कृष्टा ब्रह्मप्राप्तेः कक्षा द्वारभूता सप्तमी, इत्येवं ता भूमिकाः सप्त सप्तविधा ज्ञेयाः, पुनश्च ग्रन्थान्तरस्थितं भूमिकानामभेदमाह प्रथमेति, अधिकाराख्याऽधिकारित्वं सैवाख्या नाम यस्याः सा तथोक्ता प्रथमा प्रमथभूमिका ज्ञेया, तथा श्रवणात्मिका श्रवणं वाक्यानामादिमध्यावसानेषु एकस्मिन्ब्रह्मैक्यलक्षणेऽर्थे तात्पर्यप्रतीतिरित्युक्तलक्षणोऽर्थ आत्मा स्वरूपं यस्याः सा तथोक्ता द्वितीया भूमिका ज्ञेया ॥ ३ ॥

तृतीया मननप्राया निदिध्यासश्चतुर्थिका ।

साक्षात्कारः पञ्चमी स्यात्षष्ठी परिणतिः स्मृता ॥ ४ ॥

तृतीयेति । मननप्राया मननं श्रुतार्थस्य युक्त्या संभावितत्वानुसन्धानं मननमित्युक्तलक्षणं प्रायं बहु यस्यां सा प्रायश-

न्दोऽत्राकारान्तः सा तृतीया ज्ञेया, निदिध्यासः श्रुतार्थस्य सजातीयप्रत्ययानुवृत्तिर्विजातीयप्रत्ययरहितेत्युक्तलक्षणो विपरीतभावनानिवर्त्तको निदिध्यासो वृत्तिविशेषः सा चतुर्थिका चतुर्थभूमिका ज्ञेया, साक्षात्कारः साक्षात्करोतीति साक्षात्कारो जीवब्रह्मैक्याऽव्यवहितानुभवरूपा वृत्तिः सा पञ्चमी भूमिका ज्ञेया, परिणतिस्तस्मिन्नेव जीवब्रह्मैक्ये परिणतिः परिणामरूपा वृत्तिः सा षष्ठी भूमिका स्मृता मुनिभिरिति शेषः ॥ ४ ॥

सप्तमी तु परा काष्ठा सैव तुर्यमितीरिता ।
प्रथमायां तु विद्यार्थी द्वितीयायां पदार्थवित् ॥५॥

सप्तमीति । पराकाष्ठा तु जीवब्रह्मैक्यार्थपरिणतिरूपा वृत्तिरेव परा काष्ठा निरतिशयसुखरूपेण गाढं परिणता सती सप्तमी भूमिका ज्ञेया, सैव सप्तम्येव तुर्यमिति तुर्येत्येवं नाम्नेरिता कथिता, एवं भूमिकानामान्यभिधायेदानीं तास्वारूढपुरुषलक्षणप्रतिपादनेन तासां लक्षणं विस्तरेण प्रतिपादयितुं तास्वेवारूढलक्षणं संक्षेपेणाह द्वाभ्यां, प्रथमायां प्रथमभूमिकायां जिज्ञासाऽऽह्वायामारूढो विद्यार्थीति विद्यां जीवब्रह्माभेदापरोक्षज्ञानमर्थते तच्छीलो भवति, तु पुनर्द्वितीयायां विचाराख्यायां भूमिकायामारूढः पदार्थवित्पदानि तत्त्वमसीत्यादीनि तेषामर्थौ वाच्यलक्ष्यौ तत्त्वमोर्द्वयोरैक्यं चासिपदस्येत्यादयस्तान्वेत्तीति स तथोक्तो भवति ॥ ५ ॥

निःसंशयस्तृतीयायां चतुर्थ्यां पण्डितो भवेत् ।
प्राप्तानुभूतिः पञ्चम्यां षष्ठ्यामानन्दघूर्णितः ॥६॥

निःसंशय इति । तनुमानसानाम्न्यां तृतीयभूमिकायां निःसं-

शयो निर्गताः संशया यस्मात्स तथोक्तो भवति, चतुर्थ्यां चतुर्थ-भूमिकायां सत्त्वापत्तिनाम्न्यामारूढः पण्डितः समस्तपदपदार्थेषु समबुद्धिर्भवेत्स्यात्, तथा पञ्चम्यां पञ्चमभूमिकायामसंसक्तिनाम्न्यामारूढः प्राप्तानुभूतिः प्राप्ता लब्धाऽनुभूतिर्जीवात्मैक्यस्यानुभवो येन स तथोक्तो भवति, तथा षष्ठ्यां षष्ठभूमिकायां पदार्थाभाविनीनाम्न्यामारूढः पुरुष आनन्दघूर्णित आनन्देन भूमानन्देन घूर्णितो व्याप्तो भवेदानन्दानन्यास्वादी भवेदित्यर्थः ॥ ६ ॥

सप्तमी सहजा तुर्या तुर्यातीतमतः परम् ।
भूमिका त्रितयं पूर्वं त्वत्र जाग्रदिति स्मृतम् ॥७॥

सप्तमीति । सप्तमी सप्तमभूमिका तुर्यैतन्नाम्नी सहजा सहजस्वभावा तदारूढः सहजानन्दवान्भवतीत्यर्थः, अतः परं तुर्याख्यसप्तमभूमेः परमुत्कृष्टन्तदस्पृष्टन्तदन्यच्च तुर्यातीतं तुर्यायाः सप्तमभूमेरतीतमस्पृष्टं तत्त्वं ज्ञेयमित्यर्थः, एवं सप्तभूमिकास्वारूढलक्षणं संक्षेपतः प्रदर्श्येदानीं सप्तमभूमेस्तुर्यशब्दवाच्यत्वं यदुक्तं तद्विशदयितुं सप्तभूमिकासु चतस्रोऽवस्था दर्शयति सार्धाभ्यां भूमिकात्रितयमिति, अत्र तु अत्र ज्ञानेपि पूर्वं प्रथममवस्थात्रितयमवस्थानां भूमिकानां त्रितयं त्रिकं जिज्ञासाविचारातनुमानसाख्यं जाग्रदिति जाग्रन्नाम्ना स्मृतं प्रोक्तं मुनिभिरिति शेषः ॥ ७ ॥

कुत इत्यत आह ।

जिज्ञासोरत्र संसारो यथापूर्वं यतः स्थितः ।
चतुर्थी स्वप्न इत्युक्ता स्वप्नाभं यत्र वै जगत् ॥८॥

जिज्ञासोरिति । यद्यस्मात्कारणादत्र भूमित्रये जिज्ञासो-

र्मुमुक्षोर्यथापूर्वं पूर्वमनतिक्रम्येति यथापूर्वमज्ञानावस्थायां यथा संसारः स्थितस्तथैवेत्यर्थः, संसारो दृश्यदर्शनद्रष्टृरूपः स्थितस्तिष्ठति अत इत्यर्थः; अयं भावः, एतद्भूमित्रिके पूर्ववत्संसारप्रतीतौ सत्यामपि भूमित्रिकस्यैतस्य मोक्षसाधनत्वाज्ज्ञानत्वेन तुर्यत्वे जाग्रत्तुर्यत्वं जाग्रत्त्वं तु सप्तमीभूमिकायास्तुर्यात्वापेक्षयेति ज्ञेयं, एवं भूमित्रिके जाग्रत्त्वं प्रदर्श्येदानीमेतदपेक्षया चतुर्थ्यां स्वप्नत्वं साधयति चतुर्थीति, चतुर्थी चतुर्थभूमिका सत्त्वापत्तिनाम्नी स्वप्न इत्युक्ता स्वप्न इत्येवं नाम्नोक्ता कथिता कुत इत्यत आह स्वप्नाभमिति, यद्यतः कारणाद्यत्र चतुर्थभूमिकायां जगद्विश्वं स्वप्नाभं स्वप्नस्याभेवाभा यस्य तत्तथाभूतमस्ति प्रतीयत इत्यर्थः, अत इति योज्यम् । अत्राप्ययं भावः, ज्ञानसाधनत्वाज्ज्ञानत्वेप्यस्यां जगतो मिथ्यात्वपूर्वप्रतीतेः स्वप्नत्वं स्वप्नोत्थितपुरुषे स्वप्नपदार्थप्रतीतिरिवास्यां जगतस्तात्कालिकमिथ्यात्वेन स्वप्नतुर्यत्वमिति ॥ ८ ॥

इदानीं सुषुप्त्यवस्थाभेदप्रदर्शनपूर्वकं भूमिकाद्वये क्रमप्राप्तं सुषुप्तं दर्शयति ।

सुषुप्तिः शिथिला गाढा द्विविधाऽऽद्या तु पञ्चमी ।
षष्ठी गाढसुषुप्तिः स्यात्सप्तमी तुर्यमुच्यते ॥ ९ ॥

सुषुप्तिरिति । सुषुप्तिर्निद्रा द्विविधा द्विप्रकाराऽस्ति एका शिथिलाऽपरा गाढा घना तत्राद्या तु शिथिला सुषुप्तिस्तु पञ्चमि असंसक्तिनाम्नी पञ्चमभूमिका ज्ञेया, षष्ठी पदार्थाभाविनी भूमिका गाढसुषुप्तिर्गाढा घना सुषुप्तिर्निद्रा सा तथोक्ता स्याद्, एवं च शिथिलात्वगाढात्ववैलक्षण्येनोभयत्र भेदेपि सुषुप्तित्वं स-

ममेव । अयं भावः, प्रपञ्चास्फूर्त्या सुषुप्तत्वमहङ्कारलयाभावेन स्वरूपस्फूर्त्या च सुषुप्ततुर्यत्वमिति, यदर्थमवस्थात्रयं प्रदर्शितं तदिदानीं तुर्यत्वं सप्तम्यां दर्शयति सप्तमीति, सप्तमी सप्तमभूमिका तुर्यं तुर्यावस्थोच्यते विद्वद्भिः कथ्यते पूर्वावस्थाषट्कस्थितावस्थात्रयापेक्षया सप्तम्यास्तुर्यात्वं पूर्वावस्थाषट्कस्य ज्ञानत्वेन तुर्यत्वापेक्षया तु तुर्यतुर्यात्वमिति भावः ॥ ९ ॥

एवं ज्ञानभूमिकाः सप्तापि संक्षेपतो निरूप्येदानीं ता एव विस्तरतो वर्णयितुमज्ञानभूमिकाभ्यो ज्ञानभूमिकास्ववतरणे कारणं ज्ञापयितुं प्रश्नमुत्थापयति त्रिभिः ।

अत्र प्रश्नः ।

अत्रेति । अत्र ज्ञानभूम्यवतरणकारण इत्यर्थः, प्रश्नोऽनुयोगः क्रियत इति शेषः, तमेवाह ।

संसारमेव यो वेत्ति मोक्षमार्गं न वेत्ति यः ।
तस्य संसारिणः पूर्वं मुमुक्षा जायते कथम् ॥ १० ॥

संसारमिति । यः कश्चिदज्ञानी संसारमेव केवलं संसारं प्रपञ्चमेव वेत्ति जानाति केवलं वर्त्तमानमेव दृश्यं जानातीत्यर्थः, न तु पारमार्थिकं रूपं पारलौकिकं च, यश्चाज्ञानी मोक्षमार्गं मोक्षस्य ब्रह्मात्मभावस्थितेर्मार्गमुपायभूतं साधनं शास्त्रं च न वेत्ति न जानाति उभयोरैहिकमात्रज्ञानपारलौकिकज्ञानाभ्यां भेदे सत्यपि मोक्षमार्गाज्ञानं समानमेवेति भावः, तस्य तथाविधस्य संसारिणः संसारप्रवृत्तस्य पुरुषस्य पूर्वं प्रथमं मुमुक्षा मोक्षेच्छा कथं केन प्रकारेण जायते भवति तत्कथ्यताम् ॥ १० ॥

इदानीं पृष्टमेवार्थमाक्षिप्य पुनः पृच्छति ।

याद्दशो यस्य संस्कारस्ताद्दशी तस्य वासनाः ।
संसारसंस्कारवतो मुमुक्षा जायते कथम् ॥ ११ ॥

याद्दश इति । यस्य पुरुषस्य याद्दशो यद्वत्संस्कारः पूर्वजन्मकर्मजन्यो वासनाविधानकारणं भवति तस्य पुरुषस्य वासनेच्छाविशेषस्ताद्दशी तद्वद्भवेत्तत्र संसारसंस्कारवत इदानीं संसारप्रवृत्तस्य पूर्वमपि संसारसंस्कार एवानुमीयतेऽतस्तद्वतः पुरुषस्य मुमुक्षा मोक्षेच्छा कथं केन कारणेन जायते भवति । अत्रायं प्रयोगः, अयं संसारसंस्कारवान्भवितुमर्हति संसारे प्रवर्तमानत्वाज्जाग्रत्संसारसंस्कारेण स्वप्नसंसारप्रवृत्तवदिति, इह जन्मनि संसारप्रवृत्तस्य पूर्वजन्मन्यापि संसारसंस्कारेणैव भाव्यमिति तस्य न मोक्षमार्गे प्रवृत्तिः सम्भवतीति भावः॥११॥

ननु विषयसुखलोभेन विषयज्ञानेन विषयसाधनप्रवृत्तिवन्मोक्षविषयकज्ञानेनैव मोक्षेच्छया मोक्षसाधनेषु प्रवृतिः स्यादित्याशङ्क्य तस्याज्ञानित्वाद्विषयप्रात्यक्ष्येण मोक्षस्य चाप्रात्यक्ष्येणाऽपि तन्न भवतीत्याशयेनाह ।

मोक्षे तु विषयो नास्ति सुखं न विषयैर्विना ।
इति मूढधियां पूर्वं मुमुक्षैव कथं भवेत् ॥ १२ ॥

मोक्षेत्विति । विषयस्तु सुखसाधनभूतो विषयश्च मोक्षे वेदान्तप्रतिपाद्ये मोक्षाख्ये ब्रह्मणि नास्ति न विद्यते सुखं शर्मापि विषयैर्विना सुखकारणभूतविषयानृते न नास्तीति एवं मूढधियां मूढाऽज्ञानवती धीर्निश्चयात्मिकान्तःकरणवृत्तिर्येषां तेषां विपरीतज्ञानिनामित्यर्थः, मुमुक्षैव मोक्षेच्छैव पूर्वं प्रथमं कथं केन प्रकारेण भवेत्स्यान्न कथमपि भवेदत एवाज्ञा-

नभूभ्योऽज्ञानिनः ज्ञानभूम्यवतरणं केन हेतुना स्यात्तत्कथ्यतामिति प्रश्नतात्पर्यम् ॥ १२ ॥

एवं प्रश्नमुत्थाप्य तदुत्तरं वक्तुमाह ।

अत्रोतरम् ।

अत्रेति । अत्राज्ञानभूमिकाभ्यो ज्ञानभूम्यवतरणकारणप्रश्न इत्यर्थः, उत्तरं प्रतिवाक्यमुच्यत इति शेषः, तदेवाह ।

निष्कामा वा सकामा वा भक्तिर्विष्णोः शिवस्य वा ।
सप्रेम हृदये जाता मुमुक्षाकारणं हि तत् ॥ १३ ॥

निष्कामेति । विष्णोर्जगद्व्यापकस्य परमात्मनः साकारस्य विष्णुरूपस्य वा शिवस्य वा सुखरूपस्याहन्तादिसाक्षिणस्त्वंपदलक्ष्यस्य वा निष्कामा निर्गतः कामो हेतुर्यस्याः सा तथोक्ता तदभावपक्षद्योतको वाशब्दः, सकामा वा काम इच्छाविषयभोगानां तेन सहिता वा सप्रेम प्रेम स्नेहस्तेन सहितं यथा तथा हृदयेन्तःकरणे भक्तिर्भजनानुरागवती वृत्तिर्जातोत्पन्ना चेत्तत्तदेवेत्यर्थः, मुमुक्षाकारणं मुमुक्षायां हेतुर्भवति हि प्रसिद्धमेतन्नारदादिष्वित्यर्थः ॥ १३ ॥

स्थानभेदेनापि कृतस्य विशिष्टतपसो मोक्षेच्छाहेतुत्वमाह ।

कदाचिच्छुद्धभावेन गङ्गातीरे तपः कृतम् ।
तत्पुण्यपरिपाकेन मुमुक्षा जायते सताम् ॥ १४ ॥

कदाचिदिति । कदाचिदिह निष्कामत्वेनेह जन्मनि जन्मान्तरे वा शुद्धभावेन निष्कामतया गङ्गातीर उपलक्षणमेतत्कस्मिंश्चिद्गङ्गाद्युपलक्षिते पुण्यस्थाने तपः शीतोष्णादि सहिष्णुतया स्वस्ववर्णाश्रमोचितकर्मानुष्ठानं कृतमाचीर्णं तत्पुण्य-

परिपाकेन तस्य पुण्यस्य तपःपुण्यस्य परिपाकः फलदाने प्रवृत्तिस्तेन सतां शुद्धान्तःकरणानां मुमुक्षा मोक्षेच्छा जायत उत्पद्यते ॥ १४ ॥

कारणान्तराण्याह ।

विदुषां वीतरागाणामन्नपानादिसेवया ।

सङ्गत्या प्रणयेनापि मुमुक्षाऽऽकस्मिकी भवेत् ॥ १५॥

विदुषामिति । वीतरागाणां वीतो रागो विषयस्नेहो येषां तेषां विदुषां विवेकिनां ज्ञानिनामित्यर्थः, अन्नपानादिसेवया-ऽद्यते तदन्नं यवगोधूमादिकं सिद्धमन्नं वा पीयते तत्पानं जलादिकं ते आदिनी येषां दर्शनसंभाषणादीनां ते तथोक्तास्तेषां सेवाङ्गीकारस्तया तेषामेव सङ्गत्या समागमेन प्रणयेनापि नमस्कारेण चाकस्मिक्यकस्माद्भवाऽऽकस्मिकी कारणाननुसन्धानपूर्विकेत्यर्थः, मुमुक्षा मोक्षविषयिणीच्छा भवेत्स्यात् ॥ १५ ॥

आकस्मिकमोक्षेच्छोत्पत्तौ गीतापि प्रमाणमस्तीत्याह ।

तदुक्तम् ।

तदिति । तदाकस्मिकमोक्षेच्छाजन्म गीतायां भगवद्गीतायामुक्तं कथितं, केन वाक्येनेत्याशङ्क्य तद्वाक्यं पठति ।

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।

यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ १६॥

मनुष्याणामिति । मनुष्याणामधीतवेदवेदाङ्गस्तदर्थज्ञः शमादिगुणवान्पापभीरुर्युवा दृढः सङ्कल्पितविषयप्राप्तिमान्बलवांश्चैतादृशस्य सप्तद्वीपवती पृथिवी राज्यं धनधान्यसमृद्धिमद्यदि स्यात्तर्हि स मनुष्य इत्युच्यते तादृशानां

मनुष्याणां सहस्रेषु सहस्रसङ्ख्येषु बहुसङ्ख्येषु मध्ये कश्चित्कोपि विरलः सिद्धये मुक्त्यर्थं यतति निष्कामकर्मादिविचारान्तेषु सम्यक्प्रवर्त्तते यततामपि तादृशयत्नं कुर्वतामपि बहूनां मध्ये कश्चिद्विरलः सिद्धो मुक्तो भवति तादृशानां मध्ये कश्चिद्विरलो मामात्मानं यथार्थभूतं तत्त्वतस्तात्त्विकरूपेण वेत्ति जानाति अस्मिन्नर्थे श्रुतिरपि 'श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोपि बहवो यन्न विद्युरि'ति, अन्यापि 'कश्चिद्धीरः प्रत्यमात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्नि'ति ॥ १६ ॥

वासिष्ठवाक्यमपि प्रमाणयितुमाह।

तथा च वासिष्ठे।

तथाचेति। तथा च तथैव वासिष्ठे वासिष्ठनाम्नि ग्रन्थ उक्तमिति शेषः, कथितमित्यर्थः। केन वाक्येनेत्याशङ्कायां तद्वाक्यं पठति।

चलार्णवयुगच्छिद्रकूर्मग्रीवाप्रवेशवत्।
अनेकजन्मनामन्ते विवेकी जायते पुमान् ॥१७॥

चलेति। चलार्णवयुगच्छिद्रकूर्मग्रीवाप्रवेशवच्चलौ चञ्चलौ यावर्णवावर्णसा जलेन वातो गच्छतस्तावर्णवौ तरङ्गौ पृषोदरादित्वात्सलोपस्तयोर्युगं युग्मं तस्यच्छिद्रं मध्यवर्त्याकाशं तत्र स्थितो यः कूर्मः कमठस्तस्य कच्छपस्योभयपार्श्वे बहुकालं निरन्तरं तरङ्गकृतताडनेन विह्वलत्वे ग्रीवाप्रवेशो ग्रीवा कण्ठस्तदुपलक्षिततदाद्यङ्गप्रवेशो यथा जायते तद्वत्पुमान्पुरुषोऽनेकजन्मनामनन्तजन्ममरणोपलक्षितसुखदुःखानां स्पर्शेन खिन्नस्तदन्तःकरणबाह्यकरणानि स्वस्वविषयेभ्यो व्यावर्त्य विवेक्यात्मानात्मविवेकवाञ्जायते भवति ॥ १७ ॥

निष्कामत्वेन कृतानामुपास्तिसहितानां कर्मणामपि मोक्षहेतुभूतज्ञानेच्छाकारणत्वमाह।

सोपास्तीनां कर्मणां तु चित्तशुद्धिः फलं मतम् ।
वेदनेच्छा वेदनं वा चित्रा सत्कर्मणां गतिः ॥ १८ ॥

सोपास्तीनामिति । सोपास्तीनामुपासनासहितानां कर्मणां स्वस्ववर्णाश्रमोचितक्रियाणां तु अन्यफलेषु सत्स्वपि तद्विलक्षणं चित्तशुद्धिश्चित्तस्यान्तःकरणस्य शुद्धी रागादिमलविसर्जनमेव फलं मुख्यप्रयोजनं मतमिष्टं ज्ञेयम्, अन्तःकरणस्यातीव मलविसर्जने सति तेषामेव कर्मणां वेदनेच्छा वेदनं ज्ञानं तस्येच्छा स्पृहा जिज्ञासेत्यर्थः, तदेव फलं भवति, ततोप्यतिशयान्तःकरणशुद्धौ सत्यान्तेषामेव कर्मणां वेदनं वा ज्ञानमेव फलं भवति, ननु बन्धहेतूनां कर्मणां मुक्तिकारणं ज्ञानं कथं फलं स्यादित्याशङ्क्याह चित्रेति, सत्कर्मणां काम्यानां निष्कामानां वा सत्कर्मणां विध्युक्तकर्मणां गतिः फलं चित्राऽऽश्चर्यरूपास्ति कर्कट्यादिषु काम्यतपसोपि मुक्तिहेतुज्ञानलाभः श्रूयते वासिष्ठे, दाशूरेपि मौढ्यग्रस्तत्वेपि वह्न्याराधनेन तद्दत्तकदम्बवृक्षस्थित्या तत्रैव कर्म कृत्वान्तःकरणशुद्ध्या ज्ञानं जातमित्यादि च, तस्मादुपास्तयः कर्माण्यपि मुमुक्षाकारणानि भवन्तीत्यर्थः ॥ १८ ॥

साम्प्रदायिकैर्वेदान्तेषु कर्मणोङ्गीकृतत्वादपि कर्मणो मुमुक्षाहेतुत्वं ज्ञेयमित्याशयेनाह ।

वेदान्तैरपि जिज्ञासोस्तस्मात्कर्मोररी कृतम् ।
श्रद्धा चित्तस्य शान्तिश्च दान्तिश्चोपरमस्तथा ।
मुमुक्षा साधनानां हि संपत्प्रथमभूमिका ॥ १९ ॥

वेदान्तैरपीति । यतो ज्ञानसाधनं कर्म तस्मात्कारणाद्वेदान्तैरपि उपनिषदादिभिर्ज्ञानप्रधानफलप्रतिपादकैरपि ग्रन्थैर्जि-

ज्ञासोर्ज्ञानेच्छोरन्तःकरणशुद्ध्या ज्ञानेच्छादार्ढ्याय कर्म स्वस्ववर्णाश्रमोचितनित्यनैमित्तिकं प्रायश्चित्ताख्यमुररीकृतमङ्गीकृतमतोपि ज्ञानेच्छाहेतुत्वं कर्मणः सिद्धमिति भावः ।

एवं मुमुक्षाकारणानि प्रदर्श्येदानीं तदारोहणाय तत्साधनभूतां सम्पदं प्रथममाह ।

श्रद्धेति । श्रद्धा गुरुवेदान्तवाक्येषु विश्वासस्तथा चित्तस्यान्तःकरणस्य शान्तिर्निर्वासनत्वं च पुनर्दान्तिर्बाह्येन्द्रियाणां निग्रहः पुनरुपरमः सर्वविषयेषु विरसता तथा यद्वन्मुमुक्षाभूमिरुत्तरभूमीनां तथेयमपि मुमुक्षा साधनानां जिज्ञासाख्यभूमेः साधनानां कारणभूतानां सम्पत्प्राप्तिः प्रथमभूमिका जिज्ञासायाः प्रथमसाधनभूता तदारोहणार्थं वेदिका ज्ञेया, तुपदेनोक्तसर्वसाधनेभ्य एतस्या आवश्यकत्वं सूचितम् ॥ १९ ॥

ततोप्यन्तरङ्गमावश्यकं साधनमाह ।

गुरूपसदनं पूर्वं कर्त्तव्यं हि मुमुक्षुणा ।
गुरुमेवाभिगच्छेच्च विज्ञानार्थमिति श्रुतिः ॥ २० ॥

गुरूपसदनमिति । पूर्वं प्रथमं मुमुक्षुणा मोक्षेच्छुना गुरूपसदनं गुरोर्वेदान्तवक्तुरुपसदनं सेवकतया समीपस्थानं कर्त्तव्यङ्कार्यं हि श्रुतौ प्रसिद्धमेतत् । तामेव श्रुतिमर्थतः पठति गुरुमिति, विज्ञानार्थं ज्ञानप्राप्त्यर्थं गुरुमुक्तलक्षणं दैशिकमेवेति तं विनाज्ञानं न स्यादिति सूचितम्, अभिगछेच्छरणं भूयादिति एवं श्रुतिरस्तीति शेषः ॥ २० ॥

एवं मुमुक्षारोहणे हेतूंस्तत्साधनान्युक्त्वेदानीं जिज्ञासाभूमिकारूढलक्षणनिरूपणेन जिज्ञासालक्षणानि वक्तुमाह ।

तल्लक्षणानि ।

तस्या जिज्ञासाया लक्षणानि चिह्नानि उच्यन्त इति शेषः । तान्येवाह नवभिः ।

मोक्ष एव ममास्त्वीश मास्तु संसारदर्शनम् ।
इति यः सुदृढो भावो मुमुक्षालक्षणं हि तत् ॥ २१ ॥

मोक्ष इति । हे ईश हे अन्तर्यामिन्मम मे मोक्षेच्छोर्मोक्ष एव मुक्तिरेव केवलमस्तु भवतु संसारदर्शनं संसारस्य संसारकारणस्याज्ञानस्य तत्कार्यस्य विक्षेपस्यापि दर्शनं प्रतीतिर्मास्तु मा भवतु इत्येवं प्रकारेण सुदृढोऽनवच्छिन्नो यो यत्प्रकारको भावोन्तःकरणप्रीतिः सोऽस्तु भवतु इति यत्प्रार्थनं तन्मुमुक्षालक्षणं मुमुक्षाया जिज्ञासाभूमेर्लक्षणं चिह्नं ज्ञेयम् ॥ २१ ॥

लक्षणान्तरमाह ।

पुण्यक्षेत्रेषु या बुद्धिः पुण्यतीर्थेषु या रुचिः ।
मोक्षधर्मेषु या श्रद्धा मुमुक्षाल० ॥ २२ ॥

पुण्यक्षेत्रेष्विति । पुण्यक्षेत्रेषु पुण्यानि पवित्राणि यानि क्षेत्राणि कुरुक्षेत्रादीनि तेषु या बुद्धिर्निश्चयविशिष्टान्तःकरणप्रीतिः, किञ्च पुण्यतीर्थेषु या रुचिः पुण्यानि पवित्राणि यानि तीर्थानि पुष्करादीनि तेषु या रुचि प्रीतिः, किञ्च मोक्षधर्मेषु मोक्षस्य मुक्तेर्ये साधनभूता धर्मा निष्कामधर्मा गुरुसेवनादिविवेकान्ता वा तेषु श्रद्धा विश्वासो या प्रसिद्धा तद्धि तदपि मुमुक्षालक्षणं ज्ञेयम् ॥ २२ ॥

अथान्यदप्याह ।

यतः कुतश्चिदानीय ज्ञानशास्त्राण्यवेक्षते ।

चिन्तयंस्तस्य तात्पर्यं मुमुक्षा० ॥ २३ ॥

यत इति । यतः कुतश्चिद्यत्र कुत्रापि मिलितानि ततस्ततोपि ज्ञानशास्त्राणि वेदान्तशास्त्रगनग्रन्थानानीय संगृह्यावेक्षतेवलोकयति तस्य ग्रन्थस्य तात्पर्यमर्थं चिन्तयन्विचारयन्सन्तिष्ठति तदेतद्धि प्रसिद्धं मुमुक्षालक्षणं जिज्ञासाभूमिकायाश्चिह्नं ज्ञेयम् ॥ २३ ॥

अन्यान्यपि लक्षणान्याह ।

महतापि प्रयत्नेन कुर्यात्पण्डितसङ्गतिम् ।

संस्थापयित्वा मूर्धानं तेषां चरणपङ्कजे ॥ २४ ॥

महतेति । तेषां विदुषां चरणपङ्कजे चरणोऽङ्घ्रिरेव पङ्कजं कमलं तस्मिन् पङ्कजपदेन यथा भ्रमरः कमल आसक्तस्तथायं मुमुक्षुर्गुरुचरण आसक्तो भवेदिति सूचितमत्र मूर्धानं शिरः संस्थापयित्वा समर्प्य महतापि अखण्डेनैव प्रयत्नेन पौरुषेण विज्ञानविगय्य प्रयत्नः कार्य इति विशेयः, पण्डितसङ्गतिं पण्डितानां विवेकिनां सङ्गतिं सह वासं कुर्यात्कर्तव्यो मुमुक्षूणां सर्वदैव गुरुसेवा विहितेति भावः ॥ २४ ॥

किञ्च ।

प्रश्नान्मनोगतान्पृच्छेत्स्वाज्ञानं च प्रकाशयेत् ।

तेषामुत्तरवाक्यानां तात्पर्यं हृदि भावयेत् ॥२५॥

प्रश्नानिति । मनोगतान्मनसि स्थितान् प्रश्नान्प्रष्टव्यार्थान्पृच्छेत्कुर्यादित्यर्थः, च पुनः स्वाज्ञानं स्वस्यात्मनोऽज्ञानं प्रकाशयेद्विवेकिनामग्रे प्रकटयेत्ततस्तेषां विवेकिनामुत्तरवाक्यानां प्रतिवाक्यानां तात्पर्यमर्थं हृदि अन्तःकरणे भावयेद्-

१ आशयः ।

विचारयेदिदमपि मुमुक्षालक्षणं ज्ञेयम् ॥ २५ ॥

अन्यच्च ।

नाधर्मो रोचते यस्य यस्य धर्मे सदा रुचिः ।
काम्यधर्मे न च श्रद्धा मुमुक्षालक्षणं हि तत् ॥ २६ ॥

नेति । यस्य पुरुषस्याऽधर्मोऽविहिताचरणरूपो न रोचते न प्रियो भवति, किञ्च यस्य पुरुषस्य धर्मे श्रुतिस्मृत्युदिताचारलक्षणे सदा सर्वदा सम्पद्यापदि च रुचिः प्रीतिरस्ति, किञ्च काम्यधर्मे ऐहिकपारलौकिकविषयसाधनभूते श्रुतिस्मृत्युदिताचारे न च नैव श्रद्धा विश्वासोऽनेनैवाहं सुखीकृतार्थश्च स्यामिति मतिरित्यर्थः, तदेतद्धि प्रसिद्धं मुमुक्षालक्षणं ज्ञेयम् ॥ २६ ॥

अन्यच्च ।

रागद्वेषमदक्रोधलोभमत्सरवृत्तिषु ।
स्वभावादूग्लानिमाप्नोति मुमुक्षालक्षणं हि तत् ॥ २७ ॥

रागेति । रागद्वेषमदक्रोधलोभमत्सरवृत्तिषु रागः स्त्र्यादिषु स्नेहो द्वेषोस्तेष्वेव प्रतिकूलेष्वप्रीतिर्मदो देहाद्यहन्तया स्वोत्कृष्टत्वबुद्धिः क्रोधो रोषो लोभस्तृष्णा मत्सरः परोत्कर्षासहनमेतासु वृत्तिषु स्वभावात्सहजतयैव न तु दोषदृष्ट्या ग्लानिं वैरस्यमाप्नोति याति तदेतद्धि प्रसिद्धं मुमुक्षालक्षणं ज्ञेयम् ॥ २७ ॥

एतल्लक्षणबोधने शृङ्गारश्लोकं वक्तुमाह ।

तत्र श्लोकः ।

तत्रेति । तत्र मुमुक्षालक्षणनिरूपणे श्लोकोऽस्तीति शेषः, जातित्वादेकवचनं श्लोकाः सन्ति इत्यर्थः । तमेवाह ।

प्रेक्षितुं न विजानाति प्रेक्षणे कुरुते मनः ।
लज्जां जहाति नैवेयं वयःसन्धिरयं किल ॥ २८ ॥

प्रेक्षितुमिति । इयं सन्निकृष्टा पुरो दृश्यमाना काचिन्नायिका पतिं स्वेष्टं भर्तारं प्रेक्षितुं द्रष्टुं न विजानाति न वेत्ति मनश्च सङ्कल्पविकल्परूपा वृत्तिः प्रेक्षणे अवलोकने कुरुते प्रेरयति मनोभिलषितपतिदर्शने दृशोऽप्रवृत्तौ हेतुमाह लज्जामिति, लज्जां त्रपां नैव जहाति नैव त्यजति तदेतल्लक्षणेन लक्षितोऽयं पुरो दृश्यमाननायिकायामारूढो वयःसन्धिर्बाल्ययौवनाख्यवयसोः सन्धिर्मध्यं किलेति निश्चयेन ज्ञातव्यः, इदमेव लक्षणं मुमुक्षारूढबुद्धौ योज्यं, तथाहि प्रेक्षितुं वेदान्तशास्त्रं तत्प्रतिपाद्यमर्थं जीवब्रह्मैक्यरूपं द्रष्टुं न विजानाति न वेत्ति मूढत्वाल्लज्जालुत्वाल्लोकहास्यादिशङ्कया वा न प्रवर्त्तत इत्यर्थः, मनः सङ्कल्पविकल्परूपामन्तःकरणवृत्तिं प्रेक्षणे वेदान्तावलोकने तद्वक्तृगुरुदर्शनेपि कुरुते प्रेरयति, तर्हि कुतो न प्रवर्त्तते तत्रेत्यत आह लज्जामिति, इयं मुमुक्षुमतिः प्रकृता लज्जां त्रपां नैव जहाति नैव त्यजति तदेतल्लक्षणवानयं दृश्यमानो वयःसन्धिरज्ञानज्ञानलक्षितकालयोः सन्धिर्मध्यं किलेति निश्चयेन ज्ञेयः ॥ २८ ॥

तर्हि स सन्धावेव स्थिरो भवतूत्तरत्र प्रवृत्तः स्यान्नवेति सन्दिहानं प्रत्याह ।

चलिता स्वामिगेहाय वधूः खिद्यति रोदिति ।
इदमत्र समाधानं पदमग्रे दधाति यत् ॥ २९ ॥

इति श्रीनरहरिकृतौ बोधसारे भूमिकाभेदभास्करे प्रथमभूमिकानिर्णयः ॥ २ ॥

चलितेति । वयःसन्धिमती स्त्री 'वधूर्जाया स्नुषा स्त्री

चे'ति कोशः, स्वामिगेहाय स्वामिनः पतेर्गेहं गृहं तद्गन्तुं चलिता पितृगृहाद्बहिर्निःसृता सती खिद्यति खिन्ना भवति रोदिति अश्रुपातं करोति यदा तदेत्यध्याहार्यं तदाग्रे चलति वा नेति सन्देहेऽत्रास्मिन्संशये यत्पदमङ्घ्रिमग्रे पुरतो दधाति धत्ते तदिदं प्रत्यक्षं समाधानं प्रत्युत्तरं सन्देहनिवर्त्तकत्वाज्ज्ञेयं, तथा वधूर्बधयति बन्धयति आत्मानं सा वधूर्बुद्धिः स्वामिगेहाय स्वामिनो जीवस्य गेहं निवासस्थानं निर्विकारमात्मरूपं गन्तुं चलिता पितृगृहात्पालकत्वात्पिता मोहस्तस्य गेहं कार्यरूपं देहत्रयं तत्कारणं महामोहश्च तस्माच्चलिता चलायमाना सती खिद्यति पूर्वस्नेहसंस्कारात्खिन्ना भवति रोदिति विरक्ततया रजःप्रधानां रागरूपां वृत्तिं च स्वस्यास्त्यजति अत्रोत्तरत्र ज्ञानभूमिकासु आरोहति वा नवेति सन्देहे पदं यत्पद्यतेनेनेति पदं स्थानं स्थितिमित्यर्थः, अग्रे नूतरभूमिकासु क्रमेण दधाति धरति तदिदं प्रत्यक्षं समाधानं प्रत्युत्तरं सन्देहनिवर्त्तकं ज्ञेयम्॥२९॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपौ भूमिभेदभास्करार्थप्रकाशान्तर्गतज्ञानभूमिकार्थप्रकाशे प्रथमभूमिकार्थप्रकाशो द्वितीयः ॥ २ ॥

एवं सविस्तरां सलक्षणां प्रथमभूमिकां निरूप्येदानीं चतुस्त्रिंशच्छ्लोकैर्द्वितीयां निरूपयितुमाह ।

अथ द्वितीया ।

अथेति । अथ जिज्ञासानिरूपणानन्तरं द्वितीया विचाराख्या भूमिका निरूप्यत इति शेष, तत्र तावद्द्वितीयभूमिकालक्षणान्याह पञ्चभिः ।

प्रकृतेर्लक्षणं त्वेतदिदं विकृतिलक्षणम्।
स्वरूपं पुरुषस्येदं तद्विचारस्य लक्षणम् ॥ १ ॥

प्रकृतेर्गुणसाम्यावस्थारूपायाः कारणभूतायाः प्रकृत्याख्याया लक्षणं लक्षकं चिन्हमेतदिदमिति विकृतिलक्षणात्पुरुषलक्षणाच्च विविच्यैतदिति प्रत्यक्षतयानुभवति, तथा विकृतिलक्षणं विकृतेः कार्यवर्गस्य लक्षणं चिह्नमपीदमेतदिति प्रकृतिलक्षणात्पुरुषलक्षणाच्च विविच्यैतदिति प्रत्यक्षतयानुभवनं, तथा पुरुषस्यासङ्गोदासीनस्यात्मनः स्वरूपं स्वेनात्मना रूप्यते प्रकाशासङ्गरूपं चिन्हमिदमेतदिति प्रकृतिलक्षणाद्विकृतिलक्षणाच्च विविच्य साक्षात्करणं तदुक्तं विचारस्य लक्षणं चिन्हं ज्ञेयम् ॥१॥

अन्यदप्याह।

इदं सत्यमिदं मिथ्या त्विदं चेत्यमियं हि चित्।
इदं ब्रह्म त्वियं माया तद्विचारस्य लक्षणम् ॥ २ ॥

इदमिति। सत्यं कालत्रयाबाधमात्मस्वरूपमिदमिति सदसती विविच्य सतो विलक्षणत्वेन साक्षात्करणं, तथा मिथ्या प्रकृतिविकृतिजातं सतो विविच्येदमेतदिति साक्षादसत्त्वेनानुभवनं, तथा चेत्यं चेतनाविषयजातं प्रकृतिविकृतिरूपमिदमिति चेतनतो विविच्येदमिति साक्षात्करणं, चिद्धि चेतनापि असङ्गकूटस्थस्वरूपेयमेषेति चेत्यादसद्रूपाद्विविच्य विलक्षणत्वेनानुसन्धानं, तथा ब्रह्म देशकालवस्तुभिरपरिच्छिन्नं सच्चिदानन्दलक्षणमिदमेतदिति साक्षात्करणं, तथेयं माया माया तु अघटितघटनासमर्था शक्तिरपीयमेषेति ब्रह्मतो विविच्य साक्षादनुभवनं, तदेतद्विचारस्य लक्षणं ज्ञेयमिति पूर्ववत् ॥ २ ॥

किञ्च ।

कस्मिन्निदं कुतश्चेदं किमिदं केन वा कृतम् ।
कथमेतद्विलीयते तद्विचारस्य लक्षणम् ॥ ३ ॥

कस्मिन्निति । इदं दृश्यं कार्यकारणजातं कस्मिन्नाधारेऽस्ति सति वाऽसति, नाद्यः सदसतोराधाराधेयत्वायोगाद्, न हि खवृक्षस्य व्यावहारिकसत्त्वमाधारं दृष्टं श्रुतं वोपलभ्यते, नचासति असतो निरात्मकस्य व्यावहारिकसदाधारत्वायोगादतो जगदिदं निराधारकत्वेन दृश्यमानमपि मिथ्यैवेति निश्चयः, तथेदं दृश्यं कुतः कारणादुत्पन्नं किं सत उतासतः, न तावदाद्योऽसतो दृश्यस्य सत्कार्यत्वासम्भवाद्, नापि द्वितीयोऽसतः शून्यात्मकस्य व्यावहारिकसत्त्वेन प्रतीयमानस्य दृश्यस्य कारणत्वायोगात्, किञ्च जगतोऽसत्कार्यत्वे त्वसदसदिति प्रतीतिः स्याद्, न हि जगदसदसदिति प्रतीयतेऽतो जगतोऽसत्कार्यत्वं नेति निश्चयः, तथा किमिदमिदं दृश्यं किं सदुतासद्, न सदुत्पत्तिलयवत्त्वात्, सतो हि उत्पत्तिलयवत्त्वासम्भवाच्च, यतः श्रुतिरप्यसत्त्वं वदति 'अतोन्यदार्त्तमि'ति, अतश्चापवदति श्रुतिः, 'नेह नानास्ति किञ्चने'ति, अतो न सन्नाप्यसदसतः शशशृङ्गादेरुत्पत्त्यादिमत्त्वस्यादृष्टत्वाद् जगतस्तूत्पत्तिस्थितिलया दृश्यन्ते सत्सदितिप्रतीतिविषयं चेदमतो नासत्, सदसत्त्वपक्षस्य विरुद्धत्वान्नोभयत्वमिति निश्चयः, तथा केन वा कर्त्रा कृतमिदं दृश्यजातमुत्पादितं, तथाहि—इदं सत्कर्तृकमुतासत्कर्तृकं, न तावत्सत्कर्तृकमसतः कार्यस्य सत्कर्तृकत्वायोगाद् न हि शशशृङ्गधनुषः सद्धनुष्कारकर्तृकत्वं दृष्टं नाप्यसत्कर्तृकं व्यावहारिकसत्प्रतीतिविषयस्य जगतोऽसत्कर्तृकत्वेऽसदसदिति प्रतीतिविषयत्वसम्भवाद् न च दृश्यमसदसदिति प्रतीयतेऽतो ना-

सत्कर्तृकत्वं जगत इति निश्चयः, तदिदं जगत्कथं केनोपायेन विलीयते विनश्येत कर्मणोत योगेनऽथवा ज्ञानेन, न तावत्कर्मणा मिथ्याभुतस्य जगतः कर्मनाश्यत्वायोगान्न हि रज्जुसर्पो दण्डादिताडनरूपकर्मणा विनाशितो दृष्टोऽतो न कर्मनाश्यं जगद्, न तावद्योगेन योगस्यापि कर्मसहायत्वेन द्वैतविनाशकत्वासम्भवात् क्वचिद्योगेन विनष्टत्वेन प्रतीतावपि बीजसत्वाच्च तस्मात्परिशेषाज्ज्ञानेनैव नश्येतेति निश्चयः, अथवेदं दृश्यं सदाधारकं रज्जुसर्पादेरज्ज्वाधारत्ववत्, तथेदं दृश्यं सद्रुत्पन्नं रज्जूत्पन्नरज्जुसर्पवत्, तथेदं सद्रुसतादित्येवं विचार्यमाण उत्पत्यादिमत्त्वेनासदेवेति निश्चयः, तथाऽसत्कर्तृकत्वेऽसन्तासत्त्वात्सत्कर्तृकमेवेन्द्रजालिककर्तृकेन्द्रजालवद्, इदं कथं विलीयेतेति विचार्यमाणे ज्ञानेनैवेति निश्चयस्तदेतदिति व्याख्यातम् ॥३॥

किञ्च ।

> क ईश्वरश्च को जीवः का मुक्तिः किन्तु बन्धनम् ।
> किं द्वैतं कथमद्वैतं तद्विचारस्य लक्षणम् ॥ ४ ॥

क इति । ईशनादिशक्तिमानीश्वरः क इति सन्दिह्यविचार्य चेशनादिशक्तिमान्सर्वज्ञः सर्वकरणान्तर्यामी विद्योपाधिको निमित्तकारणमित्यादिलक्षणैर्लक्षितः पुरुषविशेष इति निश्चयः, जीवश्च क इति संदिह्याविद्योपाधिकः किञ्चिज्ज्ञादिलक्षणवान्कूटस्थसाक्षिचिदात्मसहितो बुद्धिस्थश्चिदाभासो जीव इति निश्चयः, तस्य च का मुक्तिर्मोक्षः कः किंस्वरूपमिति सन्दिह्य कूटस्थरूपेण ब्रह्माभिन्नं यथा भवति तथा स्थितिरेव मुक्तिरिति निश्चयः, तथा बन्धनं तु बन्धनमपि किं किंरूपमेवं सन्दिह्योक्तात्मरूपविपर्ययेणावस्थानं बन्धनमिति निश्चयः, तथा

किं द्वैतं द्वैतं किंरूपमिति सन्दिह्य पृथक्सत्त्वाभावादसद्रूपमिति निश्चयः, तथाऽद्वैतं द्वैतरहितमात्मस्वरूपं कथं केन प्रकारेणास्तीति सन्दिह्य सर्वदा द्वैतानुत्पत्तिमत्त्वादसङ्गत्वाच्चात्मरूपं द्वैतास्पृष्टमिति निश्चयः, तदेतद्विचारस्य लक्षणं ज्ञेयम् ॥ ४ ॥

नित्यानित्यविवेकेन नित्यवस्तुनि वस्तुता ।
अनित्ये तुच्छताबुद्धिस्तद्विचारस्य लक्षणम् ॥५॥

नित्येति । नित्यानित्यविवेकेन नित्यमात्मस्वरूपमनित्यमनात्मस्वरूपं प्रकृतिविकृत्यादि तयोर्विवेको विवेचनं तेन नित्यवस्तुनि नित्यं त्रिकालाबाध्यं यद्वस्तु आत्मस्वरूपं तस्मिन् वस्तुता सत्यत्वप्रतीतिः, ततोऽनित्येऽनात्मनि मायायां तत्कार्ये जगति च तुच्छताबुद्धिस्तुच्छत्वमुदासीनविषयत्वं तस्य बुद्धिर्निश्चयः, तदेतद्विचारस्य लक्षणं ज्ञेयं पूर्वमेव व्याख्यातम् ॥ ५ ॥

प्रौढविचारलक्षणमाह ।

एवमभ्यासयोगेन विदुषां मनसा सह ।
जायते ब्रह्मवादो यः सा तु प्रौढविचारणा ॥ ६ ॥

एवमिति । विदुषां विवेकिनामेवमुक्तरीत्याऽभ्यासयोगेनाभ्यासः पुनः पुनरावर्त्तनं तस्य योगः सम्बन्धस्तेन कृत्वा मनसा सहान्तःकरणेन समं यो ब्रह्मवादो देशकालवस्तुकृतपरिच्छेदशून्यं ब्रह्म तस्मिन्वादः पश्यन्त्याख्यवाचा सम्भाषणं जायते भवति सा तु सा च प्रौढविचारणा प्रौढा दृढा विचारणा विचारो ज्ञेया ॥ ६ ॥

तामेव शिष्यबुद्धिरोहायोदाहरति स्वयमित्यादिभिः केवलं ब्रह्म तिष्ठतीत्यन्तैरष्टाविंशतिभिः श्लोकैः ।

स्वयं प्रकाशरूपोऽयं पृष्टः कोसीति संवदेत्।
अहमज्ञो न जानामि मामहं कोहमित्युत ॥ ७ ॥

स्वयमिति। अयं जीवः स्वयं प्रकाशरूपो वस्तुतः स्वतोऽन्यप्रकाशनिरपेक्षतया प्रकाशरूपः प्रकाश एव रूपं मूर्त्तिर्यस्य स तथोक्तोपि केन चिज्ज्ञानिना प्रसङ्गेन त्वं कोसीति त्वं किंरूपोसीत्येवं पृष्ट आक्षिप्तः सन्मामात्मानमहं जीवोऽहमहमित्येवं सर्वदा व्याप्रियमाणः कः किंरूपः किं देहरूप उतेन्द्रियरूपः किं वा प्राणरूपोऽथवा मनोरूपो किंवा बुद्धिरूपः किं वाहङ्काररूपः किं वाज्ञानरूपः, एवं निश्चयेन न जानामीत्यत हेतोरहमज्ञोऽज्ञानमेवेति सम्वदेत्प्रतिवचनन्दद्यात् ॥ ७ ॥

तत्र प्रतिवचने विचारो यथा कर्तव्यस्तथाह।

आत्मभानादृते नाहमज्ञ इत्युक्तिसम्भवः।
आत्मानमेव नो वेत्ति तर्ह्ययं जड एव हि ॥ ८ ॥

आत्मभानादिति। देहादिनिरासक्रमेण बुद्धिपर्यन्ते सर्वस्मिन्निरस्तेप्यात्मज्ञानाभावेनाहमज्ञ इत्युक्तावात्मभानादृतेऽहङ्कारारोपाधिष्ठानमात्मा तस्य भानात्प्रकाशनादृत आत्मभानं वर्जयित्वाऽहमज्ञ आत्मन्यारोपितस्याज्ञानविशिष्टस्याहमः स्फूर्तिर्न स्यात्तां विना च तद्विषयकाज्ञोहमित्युक्तिर्भाषणं तस्याः सम्भवः सम्भावना न भवतीत्यर्थः, 'यन्मनसा ध्यायति तद्वाचा वदती'ति श्रुत्या वचनविषयज्ञानं विना वाचकशब्दानुच्चारस्य प्रतिपादितत्वादिति भावः, ननु केवलात्मज्ञानाभावेपि अज्ञानभानेन तद्विशिष्टाहंपदवाच्यात्मज्ञानेन वाज्ञोहमित्येवं प्रतीतिसम्भवात्तया चाज्ञोहमित्युक्तिः सम्भवेदित्याशङ्क्यात्माभानेऽङ्गीकृतेपि तेनात्मनो जडत्वेन घटादिवदज्ञाहंभावस्यापि प्रकाश-

कत्वासम्भवात्प्रकाशाभाव इत्याशयेनाहात्मानमिति, आत्मानमेवाज्ञानमहङ्कारञ्च त्यक्त्वा केवलमात्मानं नो वेत्ति न जानातीति चेत्तर्हि तस्मिन्पक्षे हि अपि अयमात्मा जड एवाभानरूप एव केवलं भवेद्धि प्रसिद्धमेवेदं स्वतोऽभानरूपेषु घटादिषु ॥८॥

इष्टापत्तिर्जगदभानेनेत्याशङ्क्य जगदान्ध्यप्रसङ्गेन दूषयति।

जडत्वाच्च घटादीनि कथमेव प्रकाशयेत्।
तस्मादयं स्वमात्मानं जानात्येवेति निर्णयः ॥ ९॥

जडत्वादिति। एवं चात्मन एवाभानेऽङ्गीकृते सति जडत्वादभानरूपत्वादात्मा घटादीनि घटो जडत्वेन प्रत्यक्षः कुम्भ आदिः प्रथमो येषां पटादिवस्तूनां तानि वस्तूनि कथं केन प्रकारेण प्रकाशयेत्प्रकाशितानि कुर्यान्न कथमपीत्यर्थः, जडस्य घटादेः पटादिप्रकाशकत्वाभाववत्त्वस्य प्रात्यक्ष्यात्तद्वदात्मनोप्यभानरूपत्वेन जडत्वे जगदान्ध्यप्रसङ्ग इति भावः, अतो भानमेव सर्वदात्मनोङ्गीकार्यमिति सिद्धान्तयति तस्मादिति, तस्मात्कारणादयं जीवः स्वं स्वीयमात्मानं स्वरूपं जानात्येव वेत्त्येवेत्येवं निश्चयो निर्णयोऽस्तीत्येवं सिद्धान्तः ॥ ९ ॥

ननु सर्वदाऽऽत्मभाने सिद्धेऽहमज्ञ इत्युक्तिवाच्यस्याहमज्ञ इति स्फुरणस्य कागतिरित्याशङ्क्याह।

अथात्मानमसौ वेत्ति परन्तु न हि वेत्ति यत्।
विशेषं स्वगतं तस्मात्स्वरूपज्ञानवानयम् ॥१०॥

अथेति। अथातः कारणादसावात्माऽऽत्मानं स्वस्वरूपं वेत्ति जानाति परन्तु तथापि न वेत्ति न जानातीति हि प्रसिद्धं यत्तत्स्वगतं स्वस्मिन्नेव स्थितं विशेषं स्वयं प्रकाशचिद्रूपापेक्षया परप्रकाश्याचिद्रूपत्वाद्विशेषरूपमज्ञानमस्ति तस्मात्तेन

कारणेनायमात्मा स्वरूपाज्ञानवान्स्वस्यात्मनो रूपमसङ्गाद्वितीयस्वप्रकाशचिन्मात्रं तस्याज्ञानं तद्वान्भवति स्वस्मिन्नज्ञानमारोप्याज्ञानवानिव प्रतीयत इति भावः ॥ १० ॥

अत्र ब्रूमो विशेषोत्र नास्त्यवाच्ये तु चिद्घने ।
निर्विशेषस्वरूपेऽत्र विशेषं यदि वेत्ति सः ॥ ११ ॥

अत्रेति । अत्रात्मन्यज्ञानस्फूर्तौ ब्रूमः कथयामोऽत्रात्मनि चिद्घने सघनचिन्मात्रस्वरूपेऽवाच्ये वाचामविषये 'यतो वाचो निवर्त्तन्ते, यद्वाचा नभ्युदितमि'त्यादिश्रुतिभ्यः, कल्पयितुरभावात्कल्पितस्यावास्तवत्वाच्च विशेषः कल्पिताज्ञानस्वरूपो नास्ति न विद्यते तुपदेनात्यन्तासत्वं सूचितमज्ञानस्य, नन्वज्ञानस्य कल्पितत्वं कथं निश्चेयं तत्राह निर्विशेषेति, निर्विशेषस्वरूपे निःशेषं गतो व्यावृत्तो विशेषोऽज्ञानस्वरूपो यस्मात्स तथोक्तः स एव स्वमसाधारणं रूपमाकृतिर्यस्य तस्मिन्नत्रात्मनि स आत्मा विशेषमज्ञानस्वरूपं यदि यर्हि वेत्ति जानाति तर्हि॥११॥

वेद्यत्वात्कल्पितः स्वस्मिंस्तेन किं तद्विचारणैः।
निर्विशेषतया ज्ञातो निर्विशेषस्वरूपवान् ॥ १२ ॥

वेद्यत्वादिति । स विशेषः स्वस्मिन्नात्मनि अतस्मिंस्तद्बुद्धिरिति तल्लक्षणसत्त्वात्कल्पित आरोपितस्तत्र हेतुर्वेद्यत्वाद्वेदनविषयत्वात्तथा चायं प्रयोगः, अयं विशेष आरोपित आधारात्पृथगसत्त्वे सति वेदनाविषयत्वान्मानोरथिकपुरवद्, अयमात्माऽनारोपितो विद्यमानत्वे सति अवेद्यत्वान्मनोरथकर्तृवत्, तेनाज्ञानस्य कल्पितत्वेन तद्विचारणैस्तस्य मिथ्याभूतस्य विशेषस्य विचारणैः किमस्य कारणं किं चास्य स्वरूपं किं चास्य कार्यमित्यादिविचारैः किं किं फलं न किमपीत्यर्थः,

तत्र बाधदृष्टिरेव कर्त्तव्या न विचारः कर्त्तव्य इति भावः,

ननु निर्विशेषात्मज्ञानमेव विचारस्य फलमस्तु तत्राह

निर्विशेषतयेति, यदि यर्हि निर्विशेषस्वरूपवान्निर्गतो विशेषोऽज्ञानरूपो यस्मात्तत्स्वरूपं यस्यासाधारणं रूपं तदेवास्यास्तीति तद्वान्सदैव निवृत्ताविद्य इत्यर्थः, आत्मा निर्विशेषतया निवृत्ताज्ञानरूपत्वेन ज्ञात उक्तविचारेण साक्षात्कृतश्चेव ॥ १२ ॥

पूर्णबोधस्तर्हि जातो जिज्ञासैव निरर्थिका ।
किञ्जातीयः किंगुणोऽसौ किञ्चेष्टो नाम तस्य किम् ॥ १३ ॥

तर्हि तदानीमेव पूर्णबोधः परिपूर्णं ज्ञानं जात उत्पन्नस्ततश्च जिज्ञासा निर्विशेषात्मज्ञानेच्छा यया विशेषविचारोऽपेक्ष्यते सैव निरर्थिका निष्फलैव।तो विशेषविचारो निरर्थक एवेति भावः ।

ननु निर्विशेषात्मज्ञानमात्मनोऽस्ति नवेति शङ्कायां तथाहशमात्मभानं स्पष्टीकर्तुं तज्जात्यादिप्रश्नमुत्थापयति ।

किं जातीय इति, असावात्मा किंजातीयः का जातिर्यस्यात्मनः स तथोक्त आत्मनः का जातिरित्यर्थः, तथाऽसावात्मा किंगुणः के गुणा यस्य स तथोक्त आत्मनो गुणाश्च क इति द्वितीयः प्रश्नः, तथाऽसावात्मा किंचेष्टः काश्चेष्टा यस्य स तथोक्त आत्मनश्चेष्टाश्च का इति तृतीयः प्रश्नः, तथा तस्यात्मनो नामाभिधानं किमिति चतुर्थः प्रश्नः, ।

किं प्रकारः किमाकारः किंविचारश्च पृच्छसि ।
न जातिर्निर्गुणस्यास्य निश्चेष्टो नाम तस्य न ॥ १४ ॥

तथा किंप्रकारोऽसावात्मा किंप्रकारः कः प्रकार प्रकृतिः स्वभावो यस्य स तथोक्त आत्मनः का प्रकृतिरिति पञ्चमः, तथा किमाकारः क आकार आकृतिर्यस्य स तथोक्त आत्मन आका-

रश्च क इति षष्ठः प्रश्नः, तथा किंविकारश्च को विकारो विकृतिर्यस्य स तथोक्त आत्मनः कार्यमपि किमिति सप्तमः प्रश्नः, एवं यदि त्वं पृच्छसि प्रश्नान्करोषि यदि तर्हि त्वं शृण्विति शेषः।

अस्य निर्गुणस्य निर्गता निवृत्ता गुणा यस्मात्स तथोक्तस्तस्यात एवास्यात्मनो जातिर्नित्यमेकमनेकवृत्तिसामान्यमित्येवंलक्षणलक्षिता जातिर्न न विद्यते गुणवद्वस्तुनिष्ठत्वाज्जातेरात्मनि गुणस्य जातेश्चाभाव इत्याशयः, तथा गुणजातिरहितत्वादेव निश्चेष्टो निर्गता निवृत्ता चेष्टा व्यापारो यस्मात्स तथोक्तोऽत एव तस्यात्मनो नामाभिधानं न नास्ति नाम्नः क्रियावद्वस्तुनिष्ठत्वादात्मनि क्रियाभावेन नाम्नोप्यभाव इति भावः॥१४॥

निष्प्रकारो निराकारो निर्विकारः स निश्चितः।
सच्चिदानन्दरूपेण जिज्ञास्य इति चेद्वदेत् ॥१५॥

निष्प्रकार इति। गुणजातिक्रियानामरहितत्वादेवात्मा स निष्प्रकारो निर्गतः प्रकारः प्रक्रिया यस्मात्स तथोक्तोऽस्ति अत एव निराकार आकृतिहीनोऽत एव निर्विकारो विकाररहितः स आत्मा निश्चित निर्णीत उपनिषत्स्विवत्यर्थः, अतो जात्याद्यभावादात्मनस्तद्वैशिष्ट्याभाववत्त्वं तेन च तद्विशिष्टात्मज्ञानाभावेपि केवलात्मज्ञानस्य विद्यमानत्वेन जिज्ञासाया नैरर्थक्यं सिद्धमिति भावः, ननु सामान्येनात्मनि ज्ञातेपि सच्चिदानन्दलक्षणैर्ज्ञातत्वाभावाज्जिज्ञासायाः सार्थक्यमस्तु इति प्रश्नमुत्थापयति सदिति, आत्मा सच्चिदानन्दरूपेण सत्कालत्रयाऽबाध्यं चिज्ज्ञानरूपमानन्दः सुखमेतत्त्रयमभिन्नं स्वरूपं यस्य तेन लक्षणेन जिज्ञास्यो ज्ञानेच्छाविषयः कर्त्तव्यः, एवं च जिज्ञासायाः सार्थकतेति चेद्वदेद्ब्रूयाच्चेत्तर्हि ॥ १५ ॥

सच्चिदानन्दरूपेण ज्ञात एवायमेव हि ।

अस्य विवरणम् ।

अयमात्मा स्वमात्मानं सद्रूपेण न वेत्ति किम् ॥ १६॥

सच्चिदानन्दरूपेणेति । अयमात्मा सच्चिदानन्दरूपेण सद्विद्यमानत्वं चिज्ज्ञानमानन्दः सुखमेतद्रूपमाकारो यस्य स तथोक्तस्तेन रूपेण ज्ञात एवानुभूत एव हीति निश्चयः । आत्मनः सच्चिदानन्दरूपत्वेन ज्ञानसत्वमेव स्पष्टीकर्त्तुं प्रतिजानीते। अस्येति, अस्य प्रतिज्ञातार्थस्य विवरणं विस्तरः क्रियत इति शेषः, तदेव निरूपयति अयमिति, हे शिष्य अयं प्रत्यगात्मा स्वीयमात्मानं स्वरूपं सद्रूपेण विद्यमानरूपत्वेन न वेत्ति किं न जानाति किमिति प्रश्नः सिद्धान्तिनः ॥ १६ ॥

नेति चेत्तत्र पृच्छति सिद्धान्ती ।

अहमस्मीति जानाति नाहमस्मीति तद्वद ।

अहमस्मीति जानाति पश्चाद्विज्ञेय आत्मनः ॥ १७॥

धर्मे चार्थे च कामे च मोक्षे च यतते स्वयम् ।

तस्मात्सद्रूपतायां तु नास्त्येवाज्ञानमात्मनः ॥ १८॥

अहमिति । हे शिष्य अहं सामान्याहन्त्वावच्छिन्नः प्रत्यगात्माऽस्मि विद्यमान इत्येवं जानाति वेत्ति वा नाहमस्मीति अहमविद्यमान एवेत्येवं जानाति तत्त्वं पृष्टं वद ब्रूहि एतत्पृष्टं विचार्य निश्चित्य ब्रूहीत्यर्थः, विचार्यमाणे च किं निश्चीयते तदाह धर्म इति, पूर्वं प्रथममहमात्माऽस्मि विद्यमान इत्येवं वेत्ति जानाति पश्चादनन्तरमात्मनः स्वस्य विज्ञेय इदन्तया स्फूर्त्ति-

विषये धर्मे श्रुतिस्मृत्युदिते स्ववर्णाश्रमोचिते परलोकसाधन-भूते कर्मणि च पुनरर्थे द्रव्यादिसाधनभूते नौसादौ च पुनः काम इन्द्रियभोगजन्यसुखसाधने विवाहादिकर्मणि च पुनर्मोक्षे मुक्तिसाधनभूते गुरुसेवाश्रवणादिकर्मणि आत्मा स्वयं यतते यत्नं करोति आत्मनः सत्त्वज्ञानाभाव आत्मनः कस्मिन्नपि कर्मणि प्रवृत्तिर्न स्यादिति भावः, उक्तमर्थमुपसंहरति तस्मादिति, तस्मा-त्कारणादात्मनः स्वस्य सद्रूपतायां सत्कालत्रयाबाध्यं रूपं स्व-भावो यस्य तस्य भावस्तत्ता तस्यां विषये स्वस्यात्मनोऽज्ञान-मस्फुरणं न विद्यते तु नास्त्येवेति निश्चयः ॥ १७ ॥ १८ ॥

एवमात्मनः स्वसद्रूपताविषयं ज्ञानं प्रसाध्येदानीं चिद्रूप-ताविषयं ज्ञानं साध्यते।

चेतनोऽहं विजानामि घटादीनीति यो वदेत्।

स्वस्य चिद्रूपतायां तु तस्याज्ञानं न विद्यते ॥१९॥

चेतन इति। य आत्मा घटादीनि घटः कुम्भ आदि-र्येषां पटादिवस्तूनां तानि अहमहन्त्वावच्छिन्नः कूटस्थ आत्मा विजानामि सामान्यतया कूटस्थरूपेण विशेषतया तत्सहितचि-दाभासरूपेण वेद्मीति अतो हेतोश्चेतनोऽहं चैतन्यस्वरूपोऽहम-स्मीति वदेदेवं ब्रूयात्तस्यात्मनः स्वस्य स्वस्वरूपभूतायां रा-होशिर इति वदभेदे षष्ठी चिद्रूपतायां चिन्मात्रस्वरूपत्वविषये-ऽज्ञानमभानं न तु विद्यते नैवास्ति स्वचिद्रूपतास्फूर्त्तिं विना-ऽहं जानामीति वागुच्चार एव न सम्भवति 'यन्मनसा ध्यायति तद्वाचा वदती'तिश्रुत्या वाच्यज्ञानं विना वचनोच्चारासम्भवस्य प्रतिपादितत्वादिति भावः ॥ १९ ॥

एवमात्मनः सच्चिद्रूपत्वभानं प्रसाध्येदानीमानन्दरूपत्व-भानं प्रसाध्य दर्शयति।

सर्वं प्रियं स्वकामाय तस्मात्प्रियतमः स्वयम्।
तेनात्मनस्तु सा युक्ता स्पष्टैवानन्दरूपता ॥२०॥

सर्वमिति। सर्वं स्त्रीपुत्रादिविषयजातं स्वकामाय स्वस्यात्मनो भोक्तृभावेन कल्पितस्य कामाय काम्यत इति कामो भोगस्तस्मै तदर्थं प्रियमिष्टं भवति सर्वविषयजातं भोक्तृशेषं न तु भोग्यशेषो भोक्तेति भावः, तथा च श्रुतिः 'नवा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवती'ति, तस्मादात्मार्थमेव सर्वस्य प्रियत्वात्स्वयमात्मा प्रियतमोऽतिशयितः प्रियोऽस्तीति निश्चयः, तेन श्रुतियुक्त्यनुभवसिद्धेन प्रियतमत्वेनातिप्रेमविषयत्वेन सुखस्यैवागोपालं लोके प्रियत्वप्रसिद्धेरात्मनः स्वस्यानन्दरूपता सुखरूपता स्पष्टैव व्यक्तैवानुभूयते, आनन्दरूपत्वज्ञानमप्यात्मनोस्त्येवेति भावः ॥ २० ॥

उपसंहरति।

तेनात्मनस्तु सा व्यक्ता सच्चिदानन्दरूपता।
तस्मात्स्वयंप्रकाशेऽस्मिन्सच्चिदानन्दरूपिणि ॥२१॥

तेनेति। तेनात्मनः सच्चिदानन्दरूपत्वज्ञानसत्त्वेनात्मन आत्मसम्बन्धिनी सा तु सापि सच्चिदानन्दरूपता सत्कालत्रयाबाध्यं चिज्ज्ञानमानन्दः सुखमेतत्त्रयमभिन्नं रूपं यस्य स तथा तस्यात्मनो भावस्तत्ता व्यक्ता भाताऽतो जिज्ञासाया निरर्थकत्वं सिद्धमिति भावः, तस्मात्कारणात्सच्चिदानन्दस्वयंप्रकाशात्मनि अज्ञानस्यासम्भवेनारोपितत्वं सिद्धमित्याह सदृष्टान्तं द्वाभ्यां तस्मादिति, तस्मात्सच्चिदानन्दरूपेण भासमानत्वात्स्वयंप्रकाशेऽवेद्यत्वे सत्यपरोक्षत्वं स्वप्रकाशत्वमित्युक्तलक्षणस्वप्रकाशलक्षणवति सच्चिदानन्दरूपिणि सदबाध्यं चिज्ज्ञान-

मानन्दः सुखमेतत्त्रयमभिन्नं रूपं विद्यते यस्य तस्मिन्नस्मिन्प्रकाशमान आत्मनि ॥ २१ ॥

आकाशे नीलिमा यद्वत्तोयं मरुमरीचिषु ।
जले च नैल्यमन्येन चेतनेन प्रकल्पितम् ।
अज्ञानं चित्स्वरूपेण स्वयं स्वस्मिन्प्रकल्पितम्॥२२॥

आकाश इति। चित्स्वरूपेण चिज्ज्ञानमेव स्वमसाधारणं रूपमाकृतिर्यस्य तेनात्मना स्वयमात्मनैवारोपककर्त्रा स्वस्मिन्नात्मन्येवाधारेऽज्ञानं ज्ञानविरुद्धं व्यावहारिकभावरूपऽमानं प्रकल्पितमारोपितं तत्र दृष्टान्ता अन्येन भिन्नेनारोपितादत्यन्तविविक्तेनेत्यर्थः, चेतनेन ज्ञानवता पुरुषेणाकाशेऽवकाशरूपे द्रव्ये वियत्संज्ञके नीलिमा नीलत्वं यद्वद्यथा तथान्येन चेतन पुरुषेण मरुमरीचिषु मरुर्धन्वा नाम देशविशेषस्तस्मिन्ये मरीचयः सूर्यकिरणास्तेषु तोयं जलमारोपितं यद्वत्तथान्येन चेतनपुरुषेण जले स्वतः शुक्लरूपे तोये नैल्यं नीलत्वं प्रकल्पितमारोपितं यद्वत्तद्वदिति योज्यम ॥ २२ ॥

तस्य चान्यथा स्फूर्तिहेतुकत्वमाह ।

मोहस्यापि स्वभावोऽयं विश्वरूपेण भासनम् ।
विद्यया नाशिते मोहे तत्स्वभावो न भासते ॥२३॥

मोहस्येति । यद्विश्वरूपेण विश्वं जगत्तदेव रूपमाकारस्तेन भासनं प्रकाशनं तदयं प्रत्यक्षो मोहस्यापि अज्ञानस्यैव स्वभावः स्वरूपमस्ति तस्य लयस्तर्हि कथं स्यात्तत्राह विद्ययेति, मोहेऽज्ञाने विद्यया ज्ञानेन नाशिते नाशं प्रापिते सति तत्स्वभावस्तस्य मोहस्याज्ञानापरपर्यायस्य स्वभावः स्वरूपं

जगद्रूपेणान्यथा भासनं न भासते न प्रतीतो भवति निमित्ता-पाये नैमित्तिकस्याप्यपायादिति भावः ॥ २३ ॥

एतदेव सदृष्टान्तं निरूपयति द्वाभ्याम् ।

जीवचैतन्यभास्यानां वृत्तीनां प्रलये लयः ।
वृत्तीनां प्रलयादेव न भासन्तेऽत्र वृत्तयः ॥२४॥

जीवेति । यथेत्यध्याहार्यं जीवचैतन्यभास्यानां जीवनाम-कमाधारभूतकूटस्थचैतन्यसहितं बुद्धिप्रतिबिम्बितं यच्चैतन्यं तस्य भास्याः प्रकाश्यास्तासां वृत्तीनां कामादिसर्ववृत्तीनां प्र-लयेऽन्तःकरणस्य कारणरूपेऽज्ञाने लये सति अज्ञानमात्राकारेण स्थितौ सत्यामित्यार्थः, लयो नाशो भवति अत्र प्रलये वृत्तीनां कामादिवृत्तीनां प्रलयान्नाशादेव वृत्तयः कामादिका न भा-सन्ते न प्रकाशन्ते ॥ २४ ॥

तत्पुनर्जीवचैतन्यं यथा पूर्वं हि वर्तते ।
न पुनर्वृत्तिभासात्मा जीवस्तत्र विनश्यति ॥२५॥

तत्पुनरिति । तत्तत्र पुनः पश्चाज्जीवचैतन्यमधिष्ठानस-हितबुद्धिस्थचिदाभासरूपं चैतन्यं यथा पूर्वं प्रथमं वृत्तिव्यवहा-रकाले यथा स्थितं तथैव वर्त्तते वर्तमानमस्ति हि प्रसिद्धमे-तद्विद्वत्सु पुनः पश्चादपि वृत्तिभासात्मा वृत्तीनां प्रकाशक आत्मा तत्र वृत्तिलये सति न विनश्यति न नष्टो भवति ॥ २५ ॥

दार्ष्टान्तिकमाह ।

आत्मचैतन्यभास्यस्य मोहस्य प्रलये तथा ।
मोह एव निवर्तेत यथा पूर्वं लसत्यसौ ॥ २६ ॥

आत्मेति । आत्मचैतन्यभास्यस्यात्मचैतन्यप्रकाश्यस्य मोहस्या-

ज्ञानस्य प्रलये प्रकर्षेण लये नाशे सति तथा तद्वन्मोह एव अज्ञानमेव केवलं निवर्त्तेत निवृत्तं भवेदसौ स आत्मा सच्चिन्मात्रस्वरूपो यथा पूर्वं मोहस्थितिकाले यथा स्थितस्तथैव लसति प्रकाशते ॥ २६ ॥

ननु बोधेन मोहे विनाशितेपि बोधः शिष्टः स्यात्तेन चात्मनः सद्वितीयत्वं भवत्वित्याशङ्क्य तन्नाशो भवेदिति स दृष्टान्तमाह ।

दीपप्रभायामायातौ श्वेतकृष्णपटौ यथा ।
तौ तया काशितौ पश्चात्तन्नाशे सा यथा स्थिता॥२७॥

दीपेति द्वाभ्याम् । दीपप्रभायां दीपस्य प्रकाशे क्रमेण युगपद्वा श्वेतकृष्णपटौ श्वेतः शुक्लः कृष्णः श्यामस्तौ च तौ पटौ वस्त्रे आयातौ प्राप्तौ तौ च तावेव तया दीपप्रभया काशितौ प्रकाशितौ तदापि दीपप्रभास्ति तन्नाशे तयोः श्वेतकृष्णपटयोर्नाशेऽन्यत्र नयने तथा दाहेन नाशे वा जाते सति पश्चादनन्तरमपि सा दीपप्रभापि यथापूर्वं प्रथमं यथा यद्वत्तथा तथैव स्थिता ॥ २७ ॥

आत्मभायां समायातौ मोहबोधौ यथाक्रमात् ।
तया प्रकाशितौ पश्चात्तन्नाशेन सा यथा स्थिता ॥२८॥

आत्मेति । आत्मभायामात्मन आत्मचैतन्यस्य भा प्रकाशस्तस्यां समायातौ काकतालीयन्यायेन प्राप्तौ क्रमात्क्रमेण मोहबोधौ मोहोऽज्ञानं बोधश्च ज्ञानं तौ च मोहबोधौ तयाऽऽत्मप्रभया प्रकाशितौ भासितौ तदापि आत्मभा यथा स्थिता तथैव तन्नाशे तयोर्मोहबोधयोर्नाशे लये सति पश्चात्तु अनन्तरमपि यथा यद्वन्मोहबोधयोः प्रकाशसमये स्थिता तद्वन्मोहबो-

धनाशसमयेपि स्थितेरर्थः, यथाग्निर्दाह्यं काष्ठादि दग्ध्वा स्वयमपि नश्यति तथा बोधोपि स्वविरुद्धमज्ञानं विनाश्य स्वयमपि नश्यत्येव ततश्चात्माशेषसम्बन्धरहितः प्रकाशत इति भावः ॥ २८ ॥

एवं द्वितीयभूमिकालक्षणनिरूपणप्रसङ्गेन विचारस्वरूपं फलपर्यन्तं प्रदर्श्येदानीं द्वितीयभूमिकाभ्यासफलं निरूपयति चतुर्भिः।

वेदान्तसंप्रदायेन कृत इत्यादिचिन्तने।
असम्भावनया युक्ता विपरीतत्वभावना ॥ २९ ॥

वेदान्त इति। वेदान्तसंप्रदायेन वेदान्तस्योपनिषदादेः संप्रदायस्तदर्थानुसन्धानं तेन तदनुकूल आचारस्तेन चेत्यादिचिन्तन इत्येवमुक्तलक्षणं चिन्तनमादि यस्य तस्मिंश्चिन्तनेऽर्थविचारे कृते पुनः पुनरभ्यासिते सति असम्भावनयोक्तार्थस्यासम्भावनाऽनङ्गीकारस्तया युक्ता सहिता विपरीतत्वभावनाऽसङ्गाद्वितीयकूटस्थात्मनि सर्ववेदान्तप्रमाणसंसिद्धेपि विपरीतत्वेन ससङ्गसद्वितीयसविकारजीवरूपत्वेन भावना प्रतीतिर्याऽस्ति ॥ २९ ॥

सा नश्यति द्वितीयायां प्रज्ञातैक्ष्ण्यं च वर्धते।
'दृश्यते त्वग्र्यया बुद्ध्या' सा बुद्धिस्तस्य जायते॥३०॥

सेति। सा विपरीतभावना द्वितीयायां विचाराख्यायां नश्यति नष्टा भवति च पुनः प्रज्ञातैक्ष्ण्यं प्रज्ञा बुद्धिस्तस्यास्तैक्ष्ण्यमज्ञानभेदनसामर्थ्यं वर्धते वृद्धं भवति अत्रार्थे श्रुतिमपि प्रमाणयति दृश्यते इति, अग्र्ययाऽग्रे भवाऽग्र्या सूक्ष्मेत्यर्थः, तया बुद्ध्या मत्या दृश्यते साक्षादनुभूयत आत्मेति शेषः, सा श्रुत्युक्ता बुद्धिर्मतिस्तस्य द्वितीयभूम्यारूढस्य जायत उत्पन्ना भवति ॥ ३० ॥

विचारफलं सदृष्टान्तमाह द्वाभ्याम् ।

सक्षारैरग्निसंस्कारैर्विहिते हेमशोधने ।
श्यामिका क्षयमायाति केवलं हेम तिष्ठति ॥३१॥

सक्षारैरिति । सक्षारैः क्षारद्रव्यसहितैरग्निसंस्कारैरग्निकृतदाहादिसंस्कारैर्हेमशोधने हेम्नः सुवर्णस्य शोधने शुद्धौ विहिते कृते सति श्यामिका कृष्णता क्षयं नाशमायाति प्राप्नोति ततः केवलं शुद्धं हेम सुवर्णं तिष्ठति अवशिष्टं भवति यथा तथेत्यध्याहार्यम् ॥ ३१ ॥

सतर्कैर्बोधसंस्कारैर्विहिते ब्रह्मशोधने ।
अविद्या क्षयमायाति केवलं ब्रह्म तिष्ठति ॥३२॥

इति श्रीनरहरिकृतौ बोधसारे भूमिकाभेदभास्करे द्वितीयभूमिकानिर्णयः ॥ २ ॥

सतर्कैरिति । तथा तद्वत्सतर्कैस्तर्कसहितैर्बोधसंस्कारैर्बोधस्य विवेकस्य दृढाभ्यासजन्यैः संस्कारैर्वासनारूपैर्ब्रह्मशोधने ब्रह्मणोऽसङ्गसच्चिदानन्दापरिच्छिन्नरूपस्यात्मनः शोधने विवेचने विहिते कृते सति अविद्या कार्यकारणरूपाऽज्ञानापरपर्याया क्षयं नाशमायाति प्राप्नोति ततश्च केवलमसङ्गाद्वितीयकूटस्थात्मस्वरूपं ब्रह्म देशकालवस्तुकृतपरिच्छेदशून्यं वस्तु तिष्ठति अवशिष्टं भवति, इदमेव द्वितीयभूमिकाभ्यासफलमिति भावः ॥ ३२ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ भूमिकाभेदभास्करार्थप्रकाशे ज्ञानद्वितीयभूमिकानिर्णयार्थप्रकाशस्तृतीयः ॥ ३ ॥

एवंलक्षणां द्वितीयभूमिकां निरूप्येदानीं सलक्षणां तृतीयभूमिकामेकादशश्लोकां निरूपयितुं प्रतिजानीते ।

अथ तृतीयभूमिकानिर्णयः ।

अथेति । अथ द्वितीयभूमिका निरूपणाऽनन्तरं तृतीया तृतीयभूमिका निरूप्यत इति शेषः, तत्रादौ पूर्वभूमिकाभ्यासहेतुकां तत्प्राप्तिमाह ।

भूमिकाद्वितयाभ्यासात्तृतीया तनुमानसा ।
मननापरपर्याया भवेत्तल्लक्षणं शृणु ॥ १ ॥

भूमिकेति । भूमिकाद्वितयाभ्यासाद्भूमिकयोर्जिज्ञासाविचाराख्ययोर्द्वितयं युग्मं तस्याभ्यासात्पुनः पुनरावर्त्तनलक्षणान्मननापरपर्याया मननमित्यपरोऽन्यः पर्यायो नाम यस्याः सा तथोक्तैतन्नाम्नी तृतीया पूर्वद्वयापेक्षया तृतीया भूमिका भवेत्स्यात्तल्लक्षणं तृतीयभूमिकाया लक्षणं चिह्नं शृणु अवधारय ॥ १ ॥

तदेव प्रतिज्ञातं चिह्नं दर्शयति ।

सान्धकारगृहस्थस्य पर्यालोचनया चिरम् ।
सूक्ष्मोऽर्थो भासते यद्वत्तृतीयायां तथा मुनेः ॥ २ ॥

सान्धकारेति । यद्वद्यादृक् सान्धकारगृहस्थस्यान्धकारेण तमसा सहितं युक्तं यद्गृहं मन्दिरं तस्मिन्स्थः स्थितो बहिर्देशादागत्य दीप्तचक्षुष्ट्या स्थितस्तस्य पुरुषस्य चिरं बहुकालं तत्रैव स्थित्वा पर्यालोचनया सर्वतोऽवलोकनेन सूक्ष्मः पूर्वं दृष्ट्यगोचरोऽर्थो घटादिपदार्थो भासते दृश्यते तथा तद्वत्तृतीयायां तृतीयभूमिकायां मनननाम्न्यां प्रथमद्वितीयभूमिका-

भ्यासेन तृतीयायां प्रविष्टस्य तत्र चिरं स्थित्वा मुनेर्मननवतः पुरुषस्य पर्यालोचनया मननेन सूक्ष्मः पूर्वं वृत्तेः स्थूलत्वात्तद्गोचरोऽर्थस्तत्त्वंपदयोरर्थौ वाच्यौ लक्ष्यश्च भागलक्षणया जीवब्रह्मैक्यलक्षणो भासतेऽनुभवारूढो भवति ॥ २ ॥

मुनेर्जात्यन्तरप्राप्तिरूपं तृतीयारूढस्य चिन्हं सदृष्टान्तमाह ।

बालस्य शूद्रकल्पस्य गायत्र्या उपदेशतः ।
यथा द्विजत्वमायाति तथा जात्यन्तरं मुनेः ॥ ३ ॥

बालस्येति । बालस्य द्विजातिभवार्भकस्य शूद्रकल्पस्य शूद्रतुल्यस्य गायत्र्या गायन्तमावर्तयन्तं पुरुषं त्रायते या सा गायत्री त्रिपदा चतुर्विंशत्यक्षरा तस्या उपदेशत उपदेशेन सार्वविभक्तिकस्तसिः, यथा यद्वद्द्विजत्वं द्वाभ्यां जन्मसंस्काराभ्यां जातो द्विजस्तस्य भावस्तत्त्वं द्विजत्वरूपं जात्यन्तरमित्यर्थः, आयाति प्राप्नोति तथा तद्वन्मुनेस्तृतीयभूमिकारूढस्य मुनित्वरूपं जात्यन्तरं द्वितीया जातिरित्यर्थः, जायत इति शेषः, इदमपि तृतीयारूढस्य चिन्हं ज्ञेयम् ॥ ३ ॥

लक्षणान्तरमाह ।

दृष्ट्वा लोकस्थितिं लीलां सविस्मय इव स्थितः ।
अन्तरेव विषीदेत तृतीयालक्षणं हि तत् ॥ ४ ॥

दृष्ट्वेति । लोकस्थितिं लोकानां दृश्यपदार्थानां स्थितिं गतिं लीलां क्षणपरिणामिनीं दृष्ट्वावलोक्य सविस्मय इव विस्मय आश्चर्यं तेन सहित इव स्थितो वर्तमानः सर्वपदार्थानां नित्यपरिणामित्वात्तेषां परिणामेन वास्तवाश्चर्यरहितोपि साश्चर्यवद्वर्तमान इति भावः, अतोन्तरेवान्तःकरण एव केवलं श्रवणादिसाध्यफलप्राप्तिपर्यन्तं शरीरादिस्थैर्याविश्वासेन विषीदेत

विषण्णो भवेत्तद्धि तत्प्रसिद्धं विवेकिषु तृतीयालक्षणं तृतीयायास्तनुमानसाया लक्षणं चिन्हं ज्ञेयम्, एतत्पूर्वत्रोत्तरत्र च योज्यम् ॥ ४ ॥

अन्यच्च ।

दिनं गतं गता रात्रिर्गतमायुर्गतं वयः ।
कदा स्थास्यामि निष्ठायां यत्र मोहो न बाधते ॥५॥

दिनमिति । दिनं दिनमिदं गतमतीतं तथा रात्रिरियं रात्रिर्निशा गताऽतीता तथाऽऽयुर्जीवनं गतं नष्टं तथा वयस्तारुण्यं गुरुसेवादिसाधनेषु क्षमं तदपि गतं नष्टं यत्र यस्यामवस्थायां मोहोऽज्ञानं न बाधते न व्यथयति तज्जन्यं दुःखं च न व्यथयति तस्यां निष्ठायां स्थितावहं कदा कस्मिन्समये स्थास्यामि स्थितो भविष्यामि एवं सदा चिन्तयति तदपि तृतीयालक्षणं ज्ञेयम् ॥ ५ ॥

अन्यदपि ।

गतेह्नि शोचति मुहुर्गतेनाह्ना किमर्जितम् ।
गतायां च तथा रात्रौ किं मे रात्र्यानयार्जितम् ॥ ६॥

गत इति । अह्नि दिने गते व्यतीते सति गतेनातीतेनाह्ना दिवसेन मोक्षेच्छुना मया मोक्षसाधनं किमर्जितं किं सम्पादितं न किमपीत्यर्थः, एवं विचार्य मुहुः पुनः पुनः शोचति शोकं करोति तथा गतायां यातायां रात्रौ निशि सत्यामनयैतया रात्र्या निशीथिन्या मया मुमुक्षुणा किमर्जितं किं सम्पादितं न किमपीत्यर्थः, एवं मुहुः पुनः पुनः शोचति शोकं करोति तृतीयालक्षणं हि तदिति च योज्यम् ॥ ६ ॥

अन्यच्चापि ।

अनिषिद्धेषु भोगेषु प्राप्तेष्वपि यदृच्छया ।

निषिद्धानिव तान्पश्येत्सा स्थितिस्तनुमानसा ॥७॥

अनिषिद्धेष्विति । अनिषिद्धेषु शास्त्रलोकाविरुद्धेषु भोगेषु भुज्यन्त इति भोगा भोग्यविषयास्तेषु यदृच्छया पूर्वकर्मानुसारेण प्राप्तेष्वपि लब्धेषु सत्स्वपि तान्भोगान्निषिद्धानिव निषिद्धाः शास्त्रलोकविरुद्धास्तानिव तद्वत्पश्येदवलोकयेद् यस्यां स्थित्यां सा स्थितिः सावस्था तनुमानसा तनुमानसानाम्नी तृतीया भूमिका ज्ञेया ॥ ७ ॥

तथान्यच्च ।

बहिर्मुखजनस्तुत्या लज्जते निन्दितो यथा ।

परमार्थिजनस्तुत्या प्रसादमधिगच्छति ॥ ८ ॥

बहिरिति । बहिर्मुखजनस्तुत्या बहिर्बाह्यविषयेषु भोजने मुखमिव भोगे प्रवृत्तबाह्येन्द्रियस्तादृशो जनः पुरुषस्तस्य स्तुतिः प्रशंसनं तया बहिर्मुखजनकृतया स्वस्तुत्या वा यथा निन्दितः सन्निन्दास्पदीभूतो यद्वल्लज्जते तद्वल्लज्जते त्रपते परमार्थिजनस्तुत्या परमः कार्यकारणातीत आत्मैवार्थो विषयः सत्यतया यस्य सेव्योस्ति तस्य तादृशजनस्य स्वकृतयान्यकृतया वा स्वस्यैवान्यतादृशजनेन कृतया वा स्तुत्या स्तवनेन प्रसादं प्रसन्नतामधिगच्छति अधिकं यथा तथा प्राप्नोति तदिदमपि तृतीया लक्षणं ज्ञेयम् ॥ ८ ॥

एवं तृतीयालक्षणान्युक्त्वा शृङ्गारश्लोकेनापि तानि निरूपयितुमाह ।

तत्र श्लोकः ।

तत्रेति । तत्र तृतीयभूमिकालक्षणनिरूपणे श्लोकः शृङ्गाररसिकः श्लोको जातित्वादेकवचनमस्ति ।

अस्यै तु पतिरात्मानं दातुमुत्कण्ठितः सदा ।
आदातुं न विजानाति नित्यमुत्कण्ठितापि सा ॥९॥

तानेवोदाहरति अस्या इति। पतिस्तु पातीति पतिर्भर्तापि अस्यै नायिकाया आत्मानं आत्मा देहस्तं तत्कृतं भोगमित्यर्थः, दातुमर्पितुं सदा नित्यमुत्कण्ठित उद्युक्तो वर्त्तते तथापि सा पत्नी नित्यं सर्वदोत्कण्ठितापि उद्युक्तापि लज्जाद्याधिक्यादादातुमङ्गीकर्त्तुं न विजानाति न वेत्ति यथा तथा प्रस्तुतेऽर्थेपि योज्यं पातीति पतिः स्वसच्चिदानन्ददानेन पालक एव बुद्धेरस्यै मोक्षेच्छावत्यै तृतीयारूढायै बुद्ध्या आत्मानं सच्चिदानन्दासङ्गकूटस्थस्वरूपमात्मभावमित्यर्थः, दातुमर्पितुं सदा नित्यं उत्कण्ठितः उद्युक्तोऽस्ति परन्तु सा मननवती बुद्धिर्नित्यं सदोत्कण्ठितापि उद्युक्तापि आदातुमात्मभावमङ्गीकर्तुं लोकेषणादिभिरवरुद्धा सती न विजानाति नवेत्ति निःशङ्कतया, इदमपि तृतीयालक्षणं ज्ञेयम् ॥ ९ ॥

ननूभयत्रापि दृष्टान्तदार्ष्टान्तिकयोः परस्परमुत्कण्ठितत्वं कुतो निश्चीयते तत्राह ।

सौभाग्यकामिनी नारी नायको रतिदायकः ।
परन्तु मुग्धभावेन किं चिरकालं विलम्बनम् ॥१०॥

सौभाग्येति। नारी स्त्री सौभाग्यकामिनी लोके हि दम्पत्योः परस्परं भोगसुखमेव सौभाग्यनाम्ना प्रसिद्धं तत्कामयितुं शीलमस्याः सा तथोक्ताऽस्ति तथा नायको नीयन्ते प्राप्यन्ते पत्न्या भोगा अस्मात्स नायकः पुरुषो रतिदायको रतेर्भोगसुखस्य दायको दानशीलोऽस्ति अतः परस्परराग-त्वेनैव परस्परमिच्छास्तीति ज्ञायत इति भावः, तर्हि कुतो न र-

तिस्तत्राह परन्त्विति, परन्तूभयोरिच्छायां सत्यामपि मुग्धभावेन मुग्धस्य मौढ्यस्य भावो विद्यमानत्वं तेन किञ्चित्कालं किञ्चित्कालपर्यन्तं विलम्बनं विलम्बो भवतीति ज्ञेयं, प्रस्तुते तु न रातीति नरो वैराग्यादिसम्पन्नः पुरुषस्तस्येयं नारी प्रपञ्चविरक्ता बुद्धिः सा सौभाग्यकामिनी सु शोभनं भगमैश्वर्यप्रसङ्गाद्वितीयरूपं तत्कामयितुं शीलमस्याः सा तथोक्ताऽस्ति तथा नायको नयति प्रापयति ब्रह्मभावं स नायको जीवोपाधिबुद्धेर्ब्रह्मभावप्रापको विवेको रतिदायको रतेर्जीवब्रह्मैक्यभावेन सुखस्य दायको दाताऽस्ति परन्तु एवं साधनसम्पन्नबुद्धौ विद्यमानायां विवेके च विद्यमाने सति मुग्धभावेन मुग्धं मौढ्यं तस्य भावः सत्त्वं तेन किञ्चित्कालं किञ्चित्कालपर्यन्तं यावत्प्रतिबन्धक्षयमित्यर्थः, विलम्बनं विलम्बोऽस्ति प्रतिबन्धक्षये जीवब्रह्मैक्यानुभवजन्यसुखाविर्भावः स्यादिति भावः ॥ १० ॥

ननूभयत्र मौढ्यमेव सुखप्रतिबन्धकमिति कुतो निश्चेयं तत्राह ।

इदमेव कथं नु स्यादिति क्लिश्यति चात्मना ।
भूयः कटाक्षकलहं करोति स्वामिना सह ॥ ११ ॥

इति श्रीनरहरिकृतौ बोधसारे भूमिकाभेदभास्करे
तृतीयभूमिकानिर्णयः ॥ ४ ॥

इदमेवेति । इयं नायिकेदमेवेदं मनोभिलषितं पत्या सह भोगसुखमेव कथं कीदृक्स्याद्भवेन्नु इति वितर्कयति च पुनरित्येवं वितर्क्यात्मनान्तःकरणेन क्लिश्यति तत्प्राप्त्यभावेन क्लिष्टा भवति तत्रैकमत्येनोभयोः केवलसुखप्राप्तिसम्भवे सति सुखेच्छायां च सत्यां विरुद्धमतित्वेन दुःखानुभवनं मौढ्यकारणकमेवेति भावः, ननु सुखेच्छायां सत्यामपि विरुद्धमति-

स्वमस्तीत्येतत्कुतोऽवगम्यत इत्याशङ्क्याह भूय इति, इयं नायिका स्वामिना पत्या सह समं भूयः पुनः पुनः कटाक्षकलहं कटाक्षः स्नेहपूर्वकं नेत्रप्रान्तेनावलोकनं कलहश्चाप्रीत्या विरुद्धवचनं च तयोः समाहारो भूयः कटाक्षकलहं करोति क्रियमाणा दृश्यते लोकेऽतः सुखसाधने सम्भोगे विद्यमाने सति सुखेच्छायां च सत्यां दुःखजनकाचारो मौढ्यविलसितमेवेति भावः, प्रकृते तु इयं साधनसंपन्ना मुमुक्षुबुद्धिरिदमेवात्मसुखं प्रपञ्चजन्यदुःखरहितं केवलं सुखं कथं कीदृक् स्याद्भवेदिति एव वितर्कयति च पुनरात्मनान्तःकरणेन क्लिश्यति क्लिष्टा भवति तत्साधनेषु क्लेशं करोतीत्यर्थः, भोगेच्छया मोक्षसुखसाधनेषु क्लेशवती, आत्मसुखेच्छया च तेषु विरज्यात्मसुखप्राप्तीच्छावती च पुनः पुनर्भवतीति केवलात्मसुखेच्छायां सत्यामपि कादाचित्कत्वपराधीनत्वदुःखमिश्रितत्वादिदोषदुष्टवैषयिकसुखस्यात्यन्तत्यागेन केवलस्वाधीनदुःखरहितसतैकसुखाननुभवो मौढ्यं विनानुपपन्न इति भावः, नन्वत्र मौढ्यमस्तीत्येतत्कुतो निश्चेयं तत्राह भूय इति, इयं मुमुक्षुबुद्धिः स्वामिना स्वपालकेनात्मना सह समं भूयः पुनः कटाक्षः सप्रेमसूक्ष्मदृष्ट्यावलोकनं 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरि'ति श्रुतेः कलहश्च वर्तमानप्रतिबन्धहेतुककुतर्केण विरुद्धवचनोच्चारस्तयोः समाहारः भूयः कटाक्षकलहं कदाचिदात्मावलोके रमणं कदाचिद्विरुद्धवाद इति भावः, करोति कुर्वती दृश्यते तदिदं मौढ्यं विनानुपपन्नमिति मौढ्यमेवात्र कारणं निश्चेयमिति भावः ॥ ११ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ भूमिकाभेदभास्करार्थप्रकाशे ज्ञानतृतीयभूमिकानिर्णयार्थप्रकाशश्चतुर्थः ॥ ४ ॥

अथ चतुर्थभूमिकानिर्णयः ।

एवं सलक्षणां तृतीयभूमिकां प्रतिपाद्येदानीं चतुर्थभूमिका-श्लो० १.८ मष्टादशश्लोकां निरूपयितुमाह ।

अथेति । अथ तृतीयभूमिकानिरूपणानन्तरं चतुर्थी चतुर्थ-भूमिका सत्त्वापत्तिनाम्नी निरूप्यत इति शेषः, तत्र तावत्पूर्वभू-मिकाभ्यासेन रजस्तमोनाशेन सत्त्ववृद्ध्या चतुर्थी प्राप्यत इत्याह ।

तृतीयभूमिकाभ्यासान्नाशमेति रजस्तमः ।
सत्त्वापत्तिश्चतुर्थी स्यान्निदिध्यासनरूपिणी ॥ १ ॥

तृतीयेति । तृतीयभूमिकाभ्यासात्तृतीयाया मननापरपर्या-यायास्तनुमानसाख्यभूमिकाया अभ्यासात्पुनःपुनरावर्तनल-क्षणाद्रजो रजोगुणस्तमस्तमोगुणस्तत्कार्येण रागमौढ्यरूपेण सहैव नाशं लयमेति प्राप्नोति यदा तदेत्यध्याहार्यं निदि-ध्यासनरूपिणी निदिध्यासनं निश्चयो ध्यानं वा तदेव रूपं स्व-भावो यस्याः सा तथोक्ता सत्त्वापत्तिनाम्नी चतुर्थी भूमिका स्याद्भवेत्प्राप्ता स्यादित्यर्थः ॥ १ ॥

ननु सत्त्वापत्तेर्मुक्तिहेतुत्वे देवानां तदापन्नानां कुतो न मु-क्तिरित्याशङ्क्य परिहरति ।

अत्राक्षेपपरीहारः ।

अत्रेति । अत्र मुक्तिसाधनभूतसत्त्वप्राप्तौ सत्यामपि देवानां मुक्त्यभावे शङ्कायामाक्षेपपरीहार आक्षेपस्याशङ्कायाः परिहार उत्तरमुच्यत इति शेषः प्रतिज्ञातं परिहारमेवाह द्वाभ्याम् ।

भोगार्थमेव देवत्वं प्राप्ता देवा न मुक्तये ।
मुमुक्षाविरहात्तेषां सत्त्वापत्तिर्न मुक्तिकृत् ॥ २ ॥

भोगार्थमिति। देवा अमरा भोगार्थमेव भुज्यन्त इति भोगा विषयास्तदर्थं तदिच्छयैव केवलं देवत्वं सत्त्वगुणप्रधानममरत्वं प्राप्ता याता न मुक्तये नैव मुक्त्यर्थमतो मुमुक्षाविरहान्मोक्तुमिच्छा मुमुक्षा तस्या विरहाद्वियोगात्तेषां देवानां सत्त्वापत्तिः सत्त्वस्य सत्त्वगुणस्यापत्तिः प्राप्तिर्मुक्तिकृन्मोक्षदा न नैव भवतीत्यर्थः ॥२॥

एवं मोक्षेच्छाव्यतिरेकेण सत्त्वापत्तेर्मुक्तिकारणत्वाभावं प्रतिपाद्येदानीं मुक्तीच्छान्वयेन तस्या एव मोक्षहेतुत्वमपि दर्शयति ।

देवेष्वपि तथा शक्रकुबेरवरुणादयः ।

ये मुमुक्षां गतास्तेषां मुक्तिप्राप्तिः किमद्भुतम् ॥३॥

देवेष्वपीति । देवेष्वपि सत्त्वापत्तिमत्स्वपि अमरेषु तथा मुक्तीच्छावन्त इत्यर्थः, शक्रकुबेरवरुणादयः शक्र इन्द्रः कुबेरो वित्तेशो वरुणो जलेश आदयो मुख्या येषु ते तथोक्ता ये ये य इत्यर्थः, मुमुक्षां मोक्षेच्छां गताः प्राप्ताः सन्ति तेषां देवानां सत्त्वापत्तिमतामपि मुक्तिप्राप्तिर्मुक्तिलाभो जातस्तत्रस्तत्र किमद्भुतं किमाश्चर्यं सप्तम्यन्तपाठे मुक्तिलाभविषय इत्यर्थः, न किमप्याश्चर्यमित्यर्थः, तस्मान्मुक्तीच्छापूर्वकसत्त्वापत्तेर्मुक्तिकारणत्वं न भोगेच्छापूर्विकाया इति भावः ॥ ३ ॥

एवं सत्त्वापत्तिप्राप्तिं सहेतुकां साक्षेपपरिहारां निरूप्येदानीं तल्लक्षणनिरूपणं प्रतिजानीते ।

अथ लक्षणानि ।

अथेति । अथेतः परं सत्त्वापत्तिप्राप्तिक्रमनिरूपणानन्तरमित्यर्थः, लक्षणानि सत्त्वापत्तेश्चिह्नानि निरूप्यन्त इति शेषः, तान्येवाह पञ्चभिः ।

एकान्ते मुक्तिगाथानां गानं रोदनमेव च ।

रोमाञ्चो गद्गदः कण्ठे सत्त्वापत्तेस्तु लक्षणम् ॥४॥

एकान्त इति । एकान्ते निर्जनस्थाने स्थित्वेति शेषः, मुक्तिगाथानां मुक्तिर्मोक्षस्तस्यास्तत्साधनभूतवैराग्यादेश्च प्रतिपादिका गाथा ग्रन्थविशेषास्तासां गानं पठनं तस्मिंश्च मध्ये मध्ये स्वस्य मुक्त्यभावस्मरणेन रोदनमश्रुपातो मध्ये मध्ये रोमाञ्चो रोमोत्थानं कण्ठे च गले गद्गदोऽस्पष्टाक्षरोच्चारः, इदं सर्वं सत्त्वापत्तेस्तु सत्त्वापतिनाम्न्याश्चतुर्थभूमिकाया लक्षणं चिह्नं ज्ञेयम् ॥ ४ ॥

इदं च परमतेन लक्षणमुक्तमिति सूचयति ।

स्वमतमाह ।

स्वमतमिति । स्वमतं स्वस्य ग्रन्थकारस्य मतमिष्टं सत्त्वापत्तेश्चिन्हमाह कथयति । तदेवाह ।

वेदान्ताः सम्यगभ्यस्ता अथ ध्येयो महेश्वरः ।
घ्रातातिसौरभे भृङ्गे रसपानं गुणाधिकम् ॥ ५ ॥

वेदान्ता इति । मुमुक्षुरेवं विचारयति मनसि वेदान्ता उपनिषत्सूत्रभाष्यादयः सम्यक्पूर्वापराविरोधेनाभ्यस्ताः पुनः पुनरवलोकिता अथेतः परं मया मुमुक्षुणा महेश्वरः सर्ववेदान्तनिर्णीतजीवब्रह्मैक्यलक्षणलक्षित आत्मेश्वरत्त्वाधिष्ठानरूपत्वादीश्वरतत्त्वं ध्येय ध्यातव्यो वेदान्तग्रन्थाभ्यासं परित्यज्य तत्प्रतिपाद्यात्मरूपमेव चिन्तनीयमिति भावः, अस्मिन्नर्थे दृष्टान्तमाह यथा घ्रातेति, घ्रातातिसौरभे घ्रातं लब्धमतिसौरभमतिगन्धवत्केसरस्थानं येन तस्मिन्भृङ्गे भ्रमरे रसपानं रसस्य तदन्तर्गतमधुनः पानं प्राशनं गुणाधिकं गुणेन

तृप्तिहेतुत्वेन मिष्टतया चाधिकमुत्कृष्टम् ॥ ५ ॥

अन्यदपि सत्त्वापत्तेर्लक्षणमाह ।

नित्योऽस्मि शुद्ध एवास्मि क्वाज्ञानं क्व च बन्धनम् ।
एवमादिचमत्कारः सत्त्वापत्तेस्तु लक्षणम् ॥ ६ ॥

नित्य इति । अहं नित्यः सद्रूपोऽस्मि भवामि अहङ्कारादिशरीरान्तलक्षणादनित्याद्भिन्नमात्मानं लक्ष्यीकृत्याहमविनाश्यस्मीति चिन्तयतीत्यर्थः, तथा शुद्ध एवास्मि शुद्धोमायाऽविद्यादिमलरहितो निश्चयेनाहं भवामि स्वस्य स्वयं प्रकाशरूपत्वान्मायाऽविद्ययोर्जडासत्त्वरूपत्वेन चासङ्गत्वादात्मनः शुद्धत्वं निश्चिनोति, तथा क्व कुत्राज्ञानं मोहोऽस्ति न कापीत्यर्थः, तथा हि अज्ञानमात्मनि विद्यते वाज्ञान उत जगति, नाद्य आत्मनः सच्चिदानन्दघननिर्विकारनिरंशत्वेनाज्ञानाधिष्ठानत्वायोगादुभयोर्विरुद्धत्वेन प्रकाशतमसोरिवाधाराधेयत्वासिद्धेः प्रत्युतनाशकत्वाच्च, नापि द्वितीयः स्वस्य स्वाधारत्वासम्भवादसत्त्वेनाप्युभयोराधाराधेयत्वाभावाच्च, न च तृतीयोपि जगतोऽज्ञानकार्यत्वेन तदाधारत्वायोगाद् न हि कारणभूताया मृदो मृत्कार्यो घट आधारो दृष्टः कार्यस्योत्पत्त्यादिमत्त्वेनोत्पत्तेः प्रागभावात्कारणस्यानुत्पन्नत्वेन सत्त्वान्न कार्यकारणयोराधाराधेयत्वमिति भावः, किञ्च क्व च बन्धनं बद्ध्यतेऽनेनेति बन्धनं बन्धसाधनं द्वैतं तत्कारणस्याज्ञानस्यासत्त्वे क्व कुत्र न कुत्राप्यस्तीत्यर्थः, अतो नित्यमुक्तः शुद्धोऽज्ञानाद्यस्पृष्ट एवाहमस्मीत्यर्थः, एवमादिचमत्कार एवमित्येवरूप आदिः प्रमुखो यस्य तथाभूतश्चमत्कारः स्वस्फुरणं सत्त्वापत्तेः सत्त्वापत्तिनाम्न्याश्चतुर्थभूमेर्लक्षणं चिह्नं ज्ञेयम् ॥ ६ ॥

अन्यच्चापि लक्षणमाह ।

यथा निजकथास्तद्वच्छृणोत्युपनिषत्कथाः ।
यथान्यस्य कथास्तद्वच्छृणोति जनसंकथाः ॥ ७ ॥

यथेति । यथा यद्वन्निजकथा अन्यकृताः स्वगुणख्यापका वार्त्ताः स्वस्तुतिप्रियः पुरुषः हर्षाविर्भावपूर्वकं शृणोति अवधारयति तद्वत्सत्त्वापत्त्यारूढः पुरुष उपनिषत्कथा उप समीपे निषण्णं वाच्यलक्ष्यभावेन ध्येयं लक्ष्यं च श्रेयो ब्रह्मसुखं यासु ता उपनिषदस्तासां कथा वार्त्ता आत्मतत्त्वप्रकाशिका वार्त्ता इत्यर्थः, शृणोत्यवधारयति, किञ्च यथेति, यथा यद्वदन्यस्य परस्य शत्रोरित्यर्थः, कथास्तद्गुणख्यापका वार्त्ता अप्रीत्या शृणोति तद्वत्तथा जनसंकथा जनस्य जन्मनः सम्बन्धिनीः कथा लौकिकीः पुराणादिष्वपि धर्माधर्मादिकथा अवतारादिचरित्राण्यपि संसारोत्कर्षबोधिनीर्वार्त्ता अपि अप्रीत्या शृणोत्यवधारयति, इदमपि सत्त्वापत्तेर्लक्षणं ज्ञेयम् ॥ ७ ॥

अन्यदपि चतुर्थीलक्षणमाह ।

देहेन्द्रियमनःप्राणबुद्ध्यहङ्कारचेतसाम् ।
निरीक्ष्य विविधाश्चेष्टा आस्ते विस्मितवन्मुनिः॥८॥

देहेन्द्रियेति । देहेन्द्रियमनःप्राणबुद्ध्यहङ्कारचेतसां देहस्यान्नमयाख्यस्य स्थूलदेहस्य जन्ममरणबाल्यतारुण्यवार्धक्यस्थूलकृशव्याधिगौरकार्ष्ण्यादयः, इन्द्रियाणां करणानां बधिरत्वाबधिरत्वकाणत्वाकारणत्वान्धत्वानन्धत्वादिरूपाः, मनसश्चेष्टाः संकल्पविकल्पाध्यासादयः, प्राणस्य श्वासादयः, बुद्धेश्चेष्टा जाग्रत्स्वप्नसुषुप्तिनिश्चयादयः, अहङ्कारस्य कर्तृत्वाकर्तृत्वसुखित्वदुःखित्वादिरूपाः,

चेतसः स्मरणास्मरणप्रत्यभिज्ञाऽप्रत्यभिज्ञानुभवाननुभवादिरूपा विविधा अनेकप्रकारा एताश्चेष्टाः क्रिया निरीक्ष्यावलोक्य विस्मितवदाश्चर्यवान्निवास्ते वर्तते, इदमपि चतुर्थीलक्षणं ज्ञेयम् ॥८॥

अथान्यदपि लक्षणमाह ।

ज्ञत्वकर्तृत्वभोक्तृत्वजन्ममृत्युजरादिकान् ।
भावाननन्यस्य जानाति तदन्यं भावमात्मनः ॥ ९ ॥

ज्ञत्वेति । ज्ञत्वकर्तृत्वभोक्तृत्वजन्ममृत्युजरादिकाञ्ज्ञत्वं ज्ञानेन्द्रियसहितस्य बुद्ध्यवस्थितचिदाभासस्य, कर्तृत्वं कर्मेन्द्रियसहितस्य बुद्ध्यवस्थितचिदाभासस्य, भोक्तृत्वमानन्दमयोपहितचिदाभासस्य जन्ममृत्युजरादिकाः स्थूलदेहस्य, तत्र तादात्म्यापन्नस्य चिदाभासस्य वा, एतान्सर्वान्भावान्विकारानन्यस्य स्वात्मतो विविक्तस्य चिदाभासस्य जानाति वेत्ति आत्मनः स्वस्य भावं स्वरूपं तदन्यं तेभ्य उक्तेभ्यो विकारेभ्योऽन्यं विलक्षणं जन्ममृत्युजराकर्तृत्वभोक्तृत्वज्ञत्वादिरहितं जानाति वेत्ति अनुभवतीत्यर्थः ॥ ९ ॥

अन्यच्चापि लक्षणमाह ।

मोहजालाद्विनिर्गत्य जालादिव विहङ्गमः ।
खेचरत्वमनुप्राप्तो धन्यतामनुविन्दति ॥ १० ॥

मोहजालादिति । जालादानायाद्विहङ्गमः पक्षी विनिर्गत्य विमुच्यानु पश्चात्खेचरत्वमाकाशगामित्वं प्राप्तः सँल्लब्धाः सन्ननु पश्चाद्धन्यतां कृतकृत्यतां विन्दति प्राप्नोतीव यथा तथाऽयं सत्त्वापन्नो मोहजालान्मोह आत्माज्ञानं स एव स्वनाशहेतुत्वाज्जालमिव जालं तस्माद्विनिर्गत्य विमुच्यानु पश्चात्खेचरत्वं सर्वद्वैतशून्यत्वोपलक्षितब्रह्माभेदवदात्मानुभवि-

तृत्वं प्राप्तः लब्धः सन्ननु पश्चाद्धन्यतां कृतकृत्यत्वरूपां निरङ्कुशां तृप्तिं विन्दति प्राप्नोतीत्यर्थः, इदमपि चतुर्थीलक्षणं ज्ञेयम्॥१०॥

अन्यच्चापि सत्त्वापतेर्लक्षणमाह।

दरिद्र इव संप्राप्य निधानं विस्मयं गतः।
ईश्वरानुग्रहो जात इति नृत्यति हृष्यति ॥ ११ ॥

दरिद्र इवेति। निधानं निधीयते द्रव्यमस्मिन्निति निधानं द्रव्यपूर्णं भाण्डं संप्राप्योपलभ्य विस्मयमाश्चर्यं गतः प्राप्तो दरिद्र इव निर्धनः पुरुष इव गर्वं प्राप्त इत्यर्थः, तथा तद्वन्मुनिः सत्त्वापन्न आत्मानन्द एव निधानं निधीयन्त आध्रियन्ते सर्वाणि सुखानि जगन्ति च यस्मिन्निति निधानं परमानन्दस्वरूपमात्मानं प्राप्योपलभ्य विस्मयमाश्चर्यं गतः प्राप्तः सन्नीश्वरानुग्रहो जात ईश्वरस्येशनादिशक्तियुक्तस्य गुरोरनुग्रहः प्रसादो मयि जात उपन्न इति एवं मत्वा नृत्यति नृत्यं करोति हृष्यति हर्षं प्राप्नोति; एतदपि सत्त्वापन्नस्य लक्षणं ज्ञेयम् ॥ ११ ॥

अन्यदपि च लक्षणमाह।

विषयैः शब्दसंस्पर्शगन्धरूपरसैर्न यः।
प्रियैरपि भवेत्तादृक्सात्त्विकानन्दमागतः ॥ १२ ॥

विषयैरिति। यः पुरुषः प्रियैरपि मौढ्यावस्थायामिष्टैरपि शब्दसंस्पर्शगन्धरूपरसैः शब्दश्चाकाशगुणत्वेन प्रसिद्धः संस्पर्शश्च वायुगुणो रूपश्च तेजोगुणो गन्धश्च पृथिवीगुणो रसश्च जलगुण एतन्नामकैर्विषयैर्गोचरैस्तादृग् यादृक्पूर्वं हर्षखेदादिविकारवान्स्थितस्तादृक्तद्वन्न भवेन्नस्यात्तत्र हेतुमाह सात्त्विकानन्दमिति, सात्त्विकानन्दं सत्त्वगुणोपाधिकमानन्दं सुखमागतः प्राप्तः, इदमपि सत्त्वापन्नस्यैव लक्षणं ज्ञेयम् ॥ १२ ॥

अन्यदपि लक्षणमाह।

व्यतिरिक्तमिवात्मानं पश्यन्भावेषु सन्नपि।

चाण्डालीमिव यो मायां न स्पृशन्दूरवत्स्थितः॥ १३॥

व्यतिरिक्तमिति। यः पुरुषो भावेषु पदार्थेषु स्वान्वयाभावे तेषामसत्त्वाद्व्यवहारायोग्यत्वाद्व्यवहारकाले तेषु सन्नपि अस्तिभातिप्रियरूपेण नामरूपात्मकेषु तेषु विद्यमानोपि अनुवृत्तोपीत्यर्थः, आत्मानं तेष्वनुवृत्तं सच्चिदानन्दरूपं भावानामसत्त्वात्ततः पृथक्त्वस्यापि तथात्वाद्व्यतिरिक्तमिव पृथगिव पश्यन्सन्पश्यमानश्चाण्डालीमिव नटरज्जुगतचाण्डालीं तत्स्थकृत्रिमब्राह्मणीमिव मायामविद्यापरपर्यायां न स्पृशन्स्पर्शमकुर्वाण एव दूरवदात्मसत्तान्वयाभावे मायातत्कार्ययोर्निर्वाहायोगान्मायायां तत्कार्ये चान्वितोपि तयोर्मिथ्यात्वेन ततो दूरत्वस्यापि सत्त्वाभावाद्दूर इव स्थितो विद्यमानोऽस्ति, इदमपि चतुर्थीलक्षणं ज्ञेयम् ॥ १३ ॥

सत्त्वापत्तेः परीपाकस्य लक्षणमाह।

औदासीन्येन यः पश्येत्स्वप्नाभं जागरे जगत्।

सत्त्वापत्तिपरिपाकलक्षणं तदुदाहृतम् ॥ १४ ॥

औदासीन्येनेति। यो विशिष्टः पुरुष औदासीन्येन उदासीनोऽनासक्तस्तस्य भाव औदासीन्यमनासक्तत्वं तेन जागरे जागरावस्थायामेव किं पुनः स्वप्नावस्थायां वक्तव्यमित्यर्थः, जगत्त्रिपुटीरूपं विश्वं स्वप्नाभं स्वप्नस्याभेवाभा कान्तिर्यस्य तत्तथा स्वप्नोत्थितपुरुषस्य स्मृतिविषयं स्वप्नजगदिवेत्यर्थः, पश्येदवलोकयेत्तदेतदुक्तं सत्त्वापत्तिपरीपाकलक्षणं सत्त्वापत्तेश्चतुर्थभूमेः परिपाकः स्थैर्येणोत्तरभूमिकासु परिणामयो-

ग्यत्वं तस्य लक्षणं चिन्हमुदाहृतं कथितं मुनिभिरिति शेषः ॥१४॥

इदानीं सत्त्वापत्तेरेव लक्षणं स्फुटं बोधयितुमाह ।

अत्र श्लोकः ।

अत्रेति । अत्र चतुर्थीलक्षणबोधने शृङ्गारश्लोकोऽस्ति अत्रापि जातित्वादेकवचनं श्लोकाः सन्तीत्यर्थः, तानेव क्रमेणाह ।

भावः सम्यक्परिज्ञातो ग्रहणेपि मनः कृतम् ।
आदानमवशिष्टं हि कृत्वाभूषणमात्मनः ॥ १५ ॥

भाव इति । भाव आशयः सम्यग्यथार्थं परिज्ञातः परीक्षित उभयोराशय उभाभ्यां ज्ञात इत्यर्थः, आत्मनः शरीरस्य भूषणमलङ्कारं कृत्वा विधाय ततो गृहणेपि परस्परमङ्गीकारेपि मनः संकल्परूपमन्तःकरणं कृतं प्रवर्त्तितं परं तु कयाचिच्छङ्कयाऽऽदानं केवलमङ्गीकरणमवशिष्टमुर्वरितं यथा, तथा मुमुक्षुबुद्ध्या निदिध्यासनवत्या भावः सत्ताऽऽत्मन इत्यर्थः, सम्यक् संशय विपर्ययरहितं यथा तथा परिज्ञातोऽवलोकितस्तत आत्मनो बुद्धेः साधनचतुष्टयमेव भूषणमलङ्करणं कृत्वा विध्याय गृहणेपि आत्मत्वाङ्गीकारेपि मनः संकल्परूपमन्तःकरणं कृतं प्रेरितं तथापि आदानं हि आत्मभावाङ्गीकरणमेव केवलमवशिष्टं केन चित्प्रतिबन्धेनोर्वरितम्, एतच्च चतुर्थभूमिस्थितपुरुषबुद्धिलक्षणं ज्ञेयम् ॥ १५ ॥

तमेव परीक्षाविषयं भावं विशदयति ।

अहं त्वनूढा तरुणी न कस्यापि परिग्रहः ।
एनमेव वरिष्यामि पतिं को वा हसिष्यति ॥ १६ ॥

अहं त्विति । तरुणी तु यौवनापन्नापि अहमनूढा न केनापि विवाहिता विवाहविधिपूर्वं नाङ्गीकृताऽस्मि मम मे केनापि पु-

रूपेण सह परिग्रहः परिगृह्यते हस्तोऽस्मिन्निति परिग्रहो विवाहो जातो नेति एनमेव मम मनःप्रियं पुरोवर्त्तिनमेव नान्यं पतिं मम पालनक्षमं पुरुषं वरिष्यामि विधिपूर्वकं परिणेष्यामि अनेन सह परिणयने जाते सति मां मा को वा पुरुषो हसिष्यति हासं करिष्यति विधिपूर्वकं परिणयने जाते उपहासाभावेन निःशङ्कं भोगसुखं स्यादिति भावः, यथा तथा मुमुक्षुबुद्धिरपि निश्चिनोति तमेव निश्चयमाह—अहमिति, तरुणी तु यौवनसंपन्ना मोक्षसुखानुभवे क्षमेत्यर्थः, अनूढा न मोहादिभिर्वरैः परिणीता तैरस्पृष्टेत्यर्थः, अहं मोक्षेच्छावती बुद्धिरात्माकारास्मि स्थितवती—अत एव न कस्यापि अहङ्कारादेः परिग्रहः सत्त्वेनाङ्गीकारो मय्यस्तीति शेषः, अतः स्वतः स्थातुमशक्यत्वादेनमेव पुरो दृश्यमानमेव पतिं स्वचित्सुखदानेन पालकमात्मानं वरिष्यामि अभिन्नत्वेनाङ्गीकरिष्यामि अहंब्रह्मास्मीत्येवं महावाक्यविचारलक्षणवेदोक्तविधिनाऽनुभविष्यामीति भावः, अत्र महावाक्यप्रमाणेनाहंब्रह्मेति स्वस्य ब्रह्माभिन्नत्वसाक्षात्करणे मां को वा हसिष्यति न कोपि हसिष्यति विधिपूर्वकं श्रुत्यादिप्रामाण्येन ब्रह्माहंभावेऽङ्गीकृते सति नोपहासास्पदं भवेदिति निश्चयः, सत्त्वापन्नबुद्धिलक्षणमेवेति भावः ॥ १६ ॥

पुनरपि सत्त्वापन्नबुद्धिलक्षणमेवाह ।

हतः कामी कटाक्षेण कयाचिन्मृगचक्षुषा ।
व्यसनित्वमवाप्नोति तथायं मुक्तिकान्तया ॥ १७॥

हत इति । यथा कामी स्त्रीकामवान्पुरुषः कया चिदतीवसुन्दर्या मृगचक्षुषा मृगस्य हरिणस्य चक्षुरिव चक्षुर्नेत्रं यस्याः सा तथोक्ता तया कान्तया कटाक्षेण नेत्रप्रान्तेन हतस्ताडितः सन् व्यसनित्वं तत्प्राप्त्यभावेन विह्वलत्वं विरहव्यथावत्त्वमित्यर्थः,

अत्राप्नोति यथा यद्वत्तथा तद्वदयं प्रकृतः सत्त्वापन्नः पुरुषो मुक्तिकान्तया मुक्तिर्मोक्ष एव कमनीयत्वात्कान्ता तया कयाचिदनिर्वचनीयया मृग्यते शोध्यते ब्रह्मसुखं येन तन्मृगमेतादृशं चक्षुर्ब्रह्मावलोकनसाधनभूता वृत्तिर्यस्याः सा तथोक्ता तया कटाक्षेण कटति आवृणोति ब्रह्मसुखमिति कटं तच्च तदक्षं नेत्रं च तेन हतः प्राप्तः सन्नहं ब्रह्मास्मीति विद्धः सन्नित्यर्थः, व्यसनित्वं मुक्तिसुखानुभवेऽत्यासक्तत्वमत्राप्नोति प्राप्नोतीत्यर्थः, इदमपि सत्त्वापन्नस्यैव लक्षणं ज्ञेयम् ॥ १७ ॥

ननु सत्त्वापन्नस्य मुक्तिसुखानुभवेऽत्यासक्तिः कुतो ज्ञेया तत्राह ।

गुञ्जद्भृङ्गिध्वनिं श्रुत्वा गुञ्जन्कीटो यथा बिले ।
ब्रह्मास्मीति तथैवायं भवितुं ब्रह्म गुञ्जति ॥ १८ ॥

इति श्रीनरहरिकृतौ बोधसारे भूमिकाभेदभास्करे
ज्ञानचतुर्थभूमिकानिर्णयः ॥ ५ ॥

गुञ्जदिति । यथा यद्वत्कीटः क्रिमिर्बिले मृदादिनिर्मिते छिद्रे स्थितः सन्गुञ्जद्भृङ्गिध्वनिं गुञ्जन्गुञ्जारवं कुर्वाणो यो भृङ्गी भ्रमरविशेषस्तस्य ध्वनिं रवं बहिर्देशाच्छ्रुत्वा श्रवणेनावधार्य स्वयं क्रिमिर्गुञ्जन्गुञ्जारवं कुर्वन्सन्तिष्ठति तथा तद्वदयं प्रकृतः सत्त्वापन्नः पुरुषः स्वदेहरूपे बिले स्थित्वा तद्बहिःस्थितस्य गुरुभ्रमरस्याहं ब्रह्मास्मीति जीवब्रह्मैक्यलक्षकं महावाक्यरूपं ध्वनिं श्रुत्वा श्रवणादिना निश्चित्यैव ब्रह्म भवितुं स्वयमपि गुरुरूपब्रह्माभिन्नभावं प्राप्तुं ब्रह्मास्मीत्येवं गुञ्जति वाक्यवृत्तिरूपं गुञ्जारवं सर्वदैव करोतीत्यर्थः ॥ १८ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपौ
भूमिकाभेदभास्करार्थप्रकाशे ज्ञानचतुर्थभूमिकानिर्णयार्थप्रकाशः पञ्चमः ॥ ५ ॥

एवं सलक्षणां सविस्तरां चतुर्थभूमिकां निरूप्येदानीं पञ्चमभूमिकानिर्णयाख्यं द्वाविंशतिश्लोकं प्रकरणं निरूपयितुमाह।

अथ पञ्चमी भूमिका।

अथेति। अथ चतुर्थभूमिकानिरूपणानन्तरं पञ्चमी पञ्चमी भूमिका निरूप्यत इत्यर्थः। तत्र तावत्सहेतुकां तत्प्राप्तिमाह।

दशाचतुष्टयाभ्यासादसंसक्तिस्तु पंचमी।
सुषुप्तिप्रथमावस्था साक्षात्कारनवांकुरा ॥ १ ॥

दशेति। दशाचतुष्टयाभ्यासाद्दशानां भूमिकानां चतुष्टयं चतुष्कं तस्याभ्यासः पुनः पुनस्तासु चित्तस्थिरीकरणं तस्माद्धेतोस्तुपदेन पूर्वाभ्यो वैलक्षण्यमस्याः सूचितम्, असंसक्तिरसंसक्तिनाम्नी सुषुप्तिप्रथमावस्था सुषुप्तेर्विद्वन्निद्रारूपायास्तुरीयाख्यायाः प्रथमा शिथिलाख्या वक्ष्यमाणावस्थारूपाऽतः साक्षात्कारनवाङ्कुरा साक्षात्कारः प्रत्यक्षानुभवस्तस्य नवस्तत्कालोत्पन्नोऽङ्कुर उद्गमो यस्यां सा तथोक्ता पञ्चमी पञ्चमभूमिका लभ्यत इति शेषः, प्राप्यत इत्यर्थः ॥ १ ॥

तल्लक्षणनिरूपणप्रतिज्ञापूर्वकं तल्लक्षणान्याह।

साऽपरोक्षा नैव निशा शृणु तस्यास्तु लक्षणम्।
प्रथमः स्वचमत्कारः स्वरूपानन्दलक्षणम् ॥ २ ॥

सेति। तस्यास्तु तस्या अपि लक्षणं लक्षणानीत्यर्थः, जातित्वादेकवचनं शृणु अवधारय तान्येवाह सा भूमिरपरोक्षा न परोक्षं ब्रह्म यस्यां सा तथोक्ताऽत एव नैव निशा विषयरूपद्वैतप्रकाशाभावेन निशात्वेन निशात्वेपि स्वप्रकाश ब्रह्मापारोक्ष्यान्नैव रात्रिः सा पञ्चमभूमिरित्यर्थः, प्रथमस्वचमत्कारः प्रथम आद्यः स्वस्यात्मनश्चमत्कारोऽनुभवः, इदमपि

लक्षणं पञ्चम्या ज्ञेयं, स्वरूपानन्दलक्षणं स्वेनैव रूप्यते प्रकाश्यत इति स्वरूपो य आनन्दः सुखं तल्लक्ष्यतेऽनेनेति स्वरूपानन्दलक्षणं चिह्नं स्वरूपसुखलक्षकत्वमपि पञ्चमभूमेर्लक्षणमित्यर्थः ॥ २ ॥

लक्षणान्तराण्याह ।

ब्रह्मत्वसंस्मृतिः सैव सैव जीवत्वविस्मृतिः ।
तदेवाज्ञानमरणममृतत्वं तदेव हि ॥ ३ ॥

ब्रह्मत्वसंस्मृतिरिति । सैव पञ्चमभूमिकैव ब्रह्मत्वसंस्मृतिः स्वस्य यत्पारमार्थिकं ब्रह्मत्वं तस्य संस्मृतिर्दृढस्मरणं पञ्चम्या लक्षणं ज्ञेयं, जीवत्वविस्मृतिः स्वस्मिन्नारोपितं यज्जीवत्वं तस्य विस्मृतिरननुसन्धानमपि सैव पञ्चमीभूमिरेव ज्ञेया, आरोपितस्य जीवत्वस्य मिथ्यात्वेन तद्विस्मृतेरपि मिथ्यात्वाद्विस्मृतिरिवविस्मृत्तिरिति व्याख्येयं सा पञ्चमी भूमिकेत्यर्थः, तथा तदेव पञ्चम्येवाऽज्ञानमरणमज्ञानस्य महामोहस्य मरणं नाशस्तदपि पञ्चम्या लक्षणं ज्ञेयम्, अमृतत्वं मोक्षस्तदेव हि तदज्ञानमरणनाम्ना प्रसिद्धमेव विवेकिनाम्, एतच्चापि पञ्चमीलक्षणं ज्ञेयम् ॥ ३ ॥

अन्यदपि लक्षणमाह ।

आविर्भूता तु सा नैव नाविर्भूतत्वभाक्पुनः ।
कथं भूयो भ्रमत्येष भ्रान्तिरेव गता यदि ॥ ४ ॥

आविर्भूतेति । सा साक्षात्काररूपा पञ्चम्यवस्था तु सर्वाभ्यो विलक्षणाविर्भूता प्राकट्यं प्राप्ता सती पुनः पश्चाद्व्यवहारेण व्यवधाने सत्यपि नाविर्भूतत्वभाक्नाविर्भूतत्वमनाविर्भूतत्वं भजते तच्छीला नैव भवेदिदमेव पूर्वाभ्यो वैलक्षण्यरूपं पञ्चम्या लक्षणमिति भावः, तदारूढवैलक्षण्यनिरूपणद्वारापि तल्लक्षणमाह भूय इति,

एष पञ्चम्यारूढो जातसाक्षात्कारः पुरुषो यदि यर्हि तस्य भ्रान्तिर्भ्रमो गतैव निवृत्तैव यतोऽतः भूयो पुनर्न भ्रमति भ्रान्तिमान्न भवति, एतदपि पञ्चम्या लक्षणं ज्ञेयम् ॥ ४ ॥

अन्यदपि लक्षणमाह।

यथा वर्तुलपाषाणा गिरेः शिखरतश्च्युताः।
ध्वंसंत्येव न तिष्ठन्ति विकारास्तद्वदत्र हि ॥ ५ ॥

यथेति। वर्त्तुलपाषाणाः कपित्थादिवद्वर्त्तुलाकाराः पाषाणा अश्मानो गिरेः पर्वतस्य शिखरतः शृङ्गाच्च्युता अधः पतिताः सन्तः ध्वंसन्त्येवाधोधः पतन्त्येव न तिष्ठन्ति मध्ये मध्ये स्थिरा न भवन्ति यथा यद्वत्तद्वत्तथा विकारा रागद्वेषादयोऽत्र पञ्चम्यारूढे पुरुषे च्युता ग्रन्थिभेदेन स्वात्मनोभिन्नत्वेनान्तःकरणे स्थिता निर्बलाः सन्तः क्रमेण ध्वंसन्त्येव नश्यन्त्येव न तिष्ठन्ति न स्थिरा भवन्ति, एतदपि पञ्चम्या लक्षणं ज्ञेयम् ॥ ५ ॥

ननु स्वस्माच्च्युतानामपि विकाराणां कुतो न स्थानं तत्राह।

मुनिरर्धकाटक्षेण यं विकारमवेक्षते।
सद्यः पतत्यसौ पृथ्व्यां नोत्तिष्ठति यथा पुनः ॥ ६ ॥

मुनिरिति। मुनिर्मननशीलो जातसाक्षात्कारोऽर्धकटाक्षेणेषद्विवेकदृष्ट्या यं मुनिवृत्तिगोचरं यं यं विकारं कामादिकं विकारमवेक्षते पश्यति असौ विकारः पृथ्व्यां प्रथयति आत्मानमनेकरूपेणेति पृथ्वी क्षेत्रशब्दवाच्या बुद्धिस्तस्यां सद्यस्तत्कालमेव पतति पतितो भवति क्षेत्र एव स्थितो भवतीत्यर्थः, यथा पुनर्यथा यद्वत्पूर्वमात्मनि प्रतीयमान उत्थितोऽभूत्तथा पुनर्भूयः स्वात्मसाक्षात्कारानन्तरं नोत्तिष्ठति

नोदितो भवति प्रारब्धशेषपर्यन्तं प्रतीयमानोपि बुद्धावेव प्रतीयते नात्मनि प्रतीयत इति भावः, तदुक्तं विद्यारण्यस्वामिभिः

'अप्रवेश्य विदात्मानं पृथक्पश्यन्नहङ्कृतिम् ।
इच्छस्तुं कोटिकस्तूनि नबाधो ग्रन्थिभेदत' इति ।

गीतायामपि ।

'पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्गच्छन्स्वपञ्छ्वसन्नि'त्यादिना,
'गुणागुणेषु वर्त्तन्त इति मत्वा न सज्जते'इत्यन्तेनोक्तमेतदेव॥६॥

अन्यदप्याह ।

अविगीते न तुष्येत्तु विगीते न विषीदति ।
विस्मरत्यखिलं कार्यं रमते स्वात्मनात्मनि ॥ ७ ॥

अविगीतेनेति । अयं पञ्चम्यारूढः पुरुषोऽविगीते विगीतं विरुद्धं वचनं लौकिकं शास्त्रीयं वा तन्न विद्यते यस्मिन्वाक्ये तस्मिन्नुच्चारिते सति न तुष्येन्न सन्तुष्टो भवेत्तु पुनर्विगीते केन चिल्लोकशास्त्रविरुद्धे वचन उच्चारिते सति न विषीदति न खिद्यति अखिलं संपूर्णं कार्यमवश्यकर्तव्यं विस्मरति नानुसन्धत्ते स्वात्मनान्तःकरणसाक्ष्यभिन्नेनान्तःकरणेनात्मनि ब्रह्माभिन्नकूटस्थे रमते क्रीडति, इदमपि पञ्चमीलक्षणं ज्ञेयमिति भावः ॥ ७ ॥

ननु तर्हि अखिलकार्यविस्मरणे सति कर्माचरणं विना देहः कथं वर्तेत तत्राह ।

भूताविष्ट इवाकस्माद्वर्णाश्रमविधिक्रमम् ।
प्रेरितः पूर्वसंस्कारैः करोति न करोत्यपि ॥ ८ ॥

भूताविष्ट इति । भूताविष्ट इव यथाभूताविष्टो भूतः पिशाच आविष्टः प्रविष्टो यस्मिन्स तथोक्तः स पुरुषोऽकस्माद-

नुसन्धानरहितोऽपि तत्क्षणमेव पूर्वसंस्कारैः पूर्वं प्रथमं यानि कृतानि कर्माणि तेषां ये संस्कारा वासनाविशेषास्तैः कृत्वा प्रेरितो नोदितः सन्वर्णाश्रमविधिक्रमं वर्णाश्च ब्राह्मणादय आश्रमाश्च ब्रह्मचारिप्रभृतयस्तेषां विधिर्वेदकृतं प्रेरणं 'ब्रह्मचर्यमामरणान्तं द्वादशवार्षिकं वाचरेत्, सन्ध्यामुपासीते'त्यादिरूपस्तस्य क्रममाचरणं करोत्यपि कर्तारं विना कर्म निर्वाह्यायोगात्तत्कृतं कर्म प्रतीयमानमपि न करोति भूतावेशेन तदनुसन्धानाभावान्न तत्कर्तृकं तत्कर्मेति भावः, तथा तद्वत्पञ्चम्यारूढो जातसाक्षात्कारः पूर्वसंस्कारः पूर्वमज्ञानावस्थायां कृतानि यानि स्वस्मिन्पारमार्थिककर्तृत्वनिश्चयेन कृतानि कर्माणि तेषां संस्कारा वासनास्तैः कृत्वा प्रेरितो नोदितः सन्नकस्मात्पूर्वापरानुसन्धानरहितस्तत्क्षणमेवेत्यर्थः, वर्णाश्रमविधिक्रमं स्ववर्णाश्रमोचितवेदप्रेरणानुकूलं कर्म करोत्यपि कर्तृत्वं विना कर्मनिर्वाहायोगात्तत्कर्तृकं कर्म प्रतीयमानमपि न करोति कर्तृत्वस्य बाधितत्वादसङ्ग आत्मनि च तद्योगात्कर्मणोऽप्यसत्वाच्च तस्मिंस्तत्कर्म च तत्कर्तृत्वं चोभयमपि न सम्भाव्यमिति भावः, एतदपि पञ्चमीलक्षणं ज्ञेयम् ॥ ८ ॥

पुनश्च लक्षणान्तरमाह सार्धेन।

यथैव लौकिकज्ञाने प्रमाणं चक्षुरादयः।
ब्रह्मज्ञानस्य विषये तथैवोपनिषन्मता ॥ ९ ॥

यथैवेति यथा यद्वल्लौकिकज्ञाने लोके भवा लौकिका घटादयो दृश्यपदार्थास्तेषां ज्ञानं प्रतीतिस्तस्मिंश्चक्षुरादयश्चक्षू रूपप्रकाशसाधनं नेत्रगोलकस्थमिन्द्रियं तदादि येषां त्वगादीनां ता वृत्तीः प्रमाणं प्रमाभूतमेवास्ति तथा तद्वद्ब्रह्मज्ञानस्य विषये ब्रह्मणो देशकालवस्तुकृतपरिच्छेदरहितस्यात्मनो

ज्ञानं भानं राहोः शिर इति वद्भेदे भेदव्यपदेशो ब्रह्मस्वरूपमेव ज्ञानमिति भावः, तस्य विषये तत्सम्बन्ध्यर्थवर्णने तज्ज्ञाने चोपनिषदुप समीपे निषण्णं स्थितं वाच्यत्वेन लक्ष्यत्वेन च ब्रह्मस्वरूपभूतं सुखं यस्यां सोपनिषत्तत्त्वमसीत्यादिवाक्यरूपा तज्जन्यं ज्ञानं च प्रमेयत्वे ब्रह्मणः प्रकाशकं मानं मताऽङ्गीकृता मुनिभिरिति शेषः ॥ ९ ॥

यत्साक्षित्वात्प्रमाणानि तानि कस्तत्र संशयः
त्रिधिकिङ्करतां त्यक्त्वा ह्यकिञ्चित्करतां गतः।
अकिञ्चनत्वमापन्नो न चिन्तयति किञ्च न ॥१०॥

यदिति। तानि लौकिकानि चक्षुरादीनि वैदिकं ब्रह्मणि विषय उपनिषदुपनिषद्वाक्यजातं तज्जन्यं ब्रह्मविषयकं ज्ञानं चैतानि स्वतो जडत्वासत्त्वाभ्यां तेषां प्रामाण्याभावाद्यत्साक्षित्वाद्यस्य पञ्चम्यारूढस्य ब्रह्माभिन्नत्वसाक्षात्कारवतो ब्रह्मरूपत्वात्तस्यैव साक्षित्वात्प्रकाश्यत्वेन प्रमाणानि प्रमेयप्रकाशकानि भवन्ति आत्मचैतन्यकृतमेव प्रामाण्यन्तेषु न स्वत इति भावः, तत्रान्यप्रमाणनिरपेक्षतया स्वतः प्रमाणभूत आत्मस्वरूपे पञ्चम्यारूढपुरुषे संशयः संदेहः कः किं रूपो न कोपीत्यर्थः, इदं निःसंशयत्वमपि पञ्चमीलक्षणं ज्ञेयम्, अन्यदप्याह विधिकिङ्करतामिति, अयं पञ्चम्यारूढो त्रिधिकिङ्करतां विधेर्वेदाज्ञायाः किङ्करो दासस्तस्य भावस्तत्ता तां त्यक्त्वाऽनादृत्याऽकिञ्चित्करतां न किञ्चित्करोतीत्याकिञ्चित्करस्तस्य भावस्तत्ता तां गतः प्राप्तः, तत्र हेतुमाहाकिञ्चनत्वमिति, अकिचनत्वं 'नेह नानास्ति किञ्चने'ति श्रुत्या निषेधितं यत्किञ्चनपदवाच्यं द्वैतं यत्र तदकिञ्चनं तेन सर्वद्वैतनिषेधावधितया लक्षितं ब्रह्म ग्राह्यं तस्य भावस्तत्त्वं ब्रह्म

त्वमापन्नः प्राप्तः किञ्चन द्वैतं तन्निषेधं वा किमपि न चिन्तयति न स्मरति, इदमपि पञ्चमीलक्षणं ज्ञेयम् ॥ १० ॥

अन्यच्चापि तदाह ।

संलग्ने प्यातपे भानोर्हिमाचलशिलेव यः ।
बहिरन्तश्च संपूर्णः शीतलत्वं न मुञ्चति ॥ ११ ॥

संलग्नेपीति । हिमाचलशिलेव यथा हिमन्तुषारस्तस्याचलः पर्वतो हिमवान् गिरिस्तस्य शिला बृहत्पाषाणो हिमपाषाण इत्यर्थः, सा भानोः सूर्यस्यातप उष्णे संलग्नेपि स्पृष्टे सत्यपि बहिर्बाह्यदेशेऽन्तश्च गर्भे संपूर्ण व्याप्तं शीतलत्वं शैत्यं न मुञ्चति न त्यजति तथा यः पञ्चम्यारूढः पुरुषः स सूर्य इव तापकोहङ्कारस्तस्य भातत्वाद्भानुरासमंतात्तापयतीत्यातपो दुःखं तस्मिन् संलग्नेपि स्वस्मिन् प्रतीते सत्यपि बहिर्दृश्यकोटावन्तश्च द्रष्टृकोटौ संपूर्ण परिपूर्णशीतलत्वं दुःखरहितसुखमात्रत्वं न मुञ्चति न त्यजति, एतच्चापि पञ्चमीलक्षणं ज्ञेयम् ॥ ११ ॥

अन्यदपि लक्षणमाह ।

स्फटिकः स्फटिकत्वज्ञः सलिलं सलिलत्ववित् ।
गगनं गगनत्वज्ञं यदि स्यात्सा दशा चितः ॥ १२ ॥

स्फटिकइति । स्फटिकः स्फटिकाश्मा स्फटिकत्वज्ञः स्वस्मिन्स्फटिकत्वं निर्मलत्वं रागाद्यस्पृष्टत्वं तज्जानातीति स तथोक्तो यदि यर्हि स्याद्भवेत्तथा सलिलं जलं सलिलत्ववित्स्वस्मिन्यत्सलिलत्वं नैल्यास्पृष्टत्वं तरङ्गादिविकारोद्भवेपि निर्विकाररूपत्वं च तद्वेत्तीति तत्तथोक्तं यदि यर्हि स्याद्भवेत्तथा गगनमाकाशं गगनत्वज्ञं स्वस्मिन्यद्गगनत्वं नीलिमाकटाहाद्याका-

रैरस्पृष्टत्वं तज्जानातीति तत्तथोक्तं यदि यर्हि स्याद्भवेत्तर्हि सा दशावस्था चितः पञ्चम्यारूढस्य पुरुषस्य चेतनाया ज्ञेया, अभूतोपमया निरूपमत्वं द्योतितं पञ्चम्यारूढपुरुषचेतनायाः । एतदपि पञ्चम्या रूपमुक्तम् ॥ १२ ॥

ननु तर्हि नानाविधसुखदुःखेषु सत्सु कथं मोहो न स्यात्पञ्चम्यारूढस्येत्याशङ्क्य तस्मिन्मोहाभावं दृष्टान्तेन सम्भावयति ।

बुधो यथा न मुह्येत नानारङ्गगृहेष्वपि ।
तथा मुह्यति नात्मायं नानारङ्गगृहेष्वपि ॥ १३ ॥

बुध इति । बुधश्चतुरः पुरुषो नानारङ्गगृहेष्वपि नानाऽनेकविधा ये रङ्गा रञ्जकद्रव्याणि येषु तथाविधेषु गृहेषु गेहेषु दर्पणादिभिर्मार्गादिविस्मारकेषु वसन्नपि न मुह्यति मोहं न प्राप्नोति यथा तथा तद्वदयं पञ्चम्यारूढो यत आत्मैव परिपूर्णः पुरुषोऽतो नानारङ्गगृहेष्वपि नानाऽनेकविधा रङ्गा रञ्जका अतिग्रहापरपर्याया विषयास्तैर्युक्तेषु गृहेषु गृह्यन्ते विषया यैस्तेषु इन्द्रियेषु व्यवहारदृष्ट्या वर्तमानोपि न मुह्यति तत्सत्त्वनिश्चयेन स्वात्मानं न विस्मरति, इदमपि पञ्चम्या लक्षणं ज्ञेयम् ॥ १३ ॥

ननु तर्हि बहिर्मुखजनसङ्गं त्यक्त्वा पञ्चम्यारुढ आत्मानुसन्धानानुकूलेषु तत्त्ववित्सु गुहादौ वा वसेदित्याशङ्क्यैकान्तवासो विद्वत्सु वासो मूढजनवासश्च सम एव तस्येति सदृष्टान्तमाह ।

योगी क्रीडति निद्राति हसत्यपि वदत्यपि ।
बहिर्मुखैरपि जनैः पिशाचैरिव शंकरः ॥ १४ ॥

योगीति । योगी जीवब्रह्मैक्यज्ञानवान् पञ्चम्यारूढः पुरुषो बहिर्मुखैरपि बहिर्मुखा मूढास्तैः सहापि शब्दादिद्वद्भिरपि जनैः

पुरुषैः सह क्रीडति रमते कदाचिन्निद्राति तैरेव सह निद्रासुखमपि अनुभवति तथा हसत्यपि तैः सह हास्यादिकं करोति तथा वदत्यपि तैः साकं भाषणमपि करोति एतादृशव्यवहारे तेन कृतेऽपि तस्य योगित्वं न नश्यतीति भावः । तत्र दृष्टान्तः, पिशाचैरिवेति, शङ्करः सकलजगदानन्दकरः शिवो यथा पिशाचैर्भूतप्रेतादिभिः सह क्रीडादिकं कुर्वन्नपि जगदानन्दकरस्वभावान्न च्यवति तद्वदित्यर्थः ॥ १४ ॥

ननु पञ्चम्यारूढे किं सुखमस्ति येन ब्रह्मेन्द्रादिपदप्रापककर्मत्यागेन तत्रैवासक्तो भवेत्तत्राह ।

न प्राप्तपरमार्थस्य तुलामर्हति वासवः ।
वासवस्तत्पदाकांक्षी न स वासवताप्रियः ॥ १५ ॥

नेति । वासव इन्द्र उपलक्षणमेतद्ब्रह्मादीनामपि प्राप्तपरमार्थस्य प्राप्तो लब्धः परमोऽतिश्रेष्ठोऽर्थस्तत्त्वं येन स तथोक्तो जातसाक्षात्कार इत्यर्थः, तस्य तुलां तुलनां नार्हति योग्यो न भवति कुत इस्रत आह वासव इति, वासव इन्द्रस्तत्पदाकाङ्क्षी तस्य पञ्चम्यारूढस्य पदं पञ्चमीभूमिकास्थितिरूपं तस्याऽऽकाङ्क्षेच्छावानस्तीति शेषः, स जातसाक्षात्कारः पञ्चम्यारूढः पुरुषो वासवताप्रियः वासवो इन्द्रस्तस्य भावस्तत्तेन्द्रपदमित्यर्थः, उपलक्षणमेतद्ब्रह्मादिपदानां सा प्रिया यस्य स तथोक्तो न न भवति ब्रह्मादिपदसुखस्यात्मानन्दकणत्वेनासत्त्वेन च ज्ञानीच्छाविषयत्वाभावः, ज्ञानिप्राप्तसुखे तु पारमार्थिकत्वेन ब्रह्मेन्द्रादिकामनाविषयत्वमिति भावः ॥ १५ ॥

ननु ज्ञानिनां प्रारब्धशेषे देहधारणस्य प्रतीयमानत्वात्कथं देहराहित्यं तस्मिंश्च सति कर्मफलेच्छाभावेन कर्मण्यप्रवृत्तौ तां विना देहनिर्वाहः कथं स्यादित्याशङ्क्य दृष्टान्तेन तत्सम्भावयति।

वन्हिपक्वं यथा मांसं पूर्ववत्स्थितमस्थिषु ।
संसक्तमप्यसंसक्तं स्वशरीरे तथा मुनिः ॥ १६ ॥

वन्हिपक्वमिति । वह्निपक्वं वह्निरग्निस्तस्मिन्पक्वं पाचितं सन्मांसं पिशितं यथा यद्वदस्थिषु अस्थिनि तत्सन्धौ च पूर्ववदपक्वावस्थायामिव स्थितं वर्तमानमपि न स्थितं नैव निष्ठति कुत इत्यत आह संसक्तमिति, तन्मांसं संसक्तमपि अस्थिसंलग्नमपि दृश्यमानत्वादसंसक्तं न संसक्तं नैव संलग्नं दृढत्वादिपरिणामस्यादृश्यमानत्वात्तथा तद्वन्मुनिर्जातसाक्षात्कारत्वात्पञ्चम्यारूढः स्वशरीरे स्वस्यात्मनः शरीरं देहस्तस्मिनासक्तोपि देहाभिमानाभावे देहचलनाद्ययोगादासक्त इव प्रतीयमानोपि नासक्तो बाधितत्वेनाहङ्कारादेरासक्तो न भवति पूर्ववदविद्यावस्थायामिव लोकवद्व्याप्रियमाणत्वात्स्वशरीरे स्थितोपि विद्यमानोपि तद्दृष्ट्या बाधितत्वान्न स्थितो नैव विद्यमानः, इदमपि पञ्चमीलक्षणं ज्ञेयम् ॥ १६ ॥

उक्तपञ्चमीलक्षणानुभवायैव शृङ्गारश्लोकैस्तु तल्लक्षणं निरूपयितुं प्रतिजानीते तत्रेति ।

तत्र श्लोकाः ।

तत्र पञ्चमीलक्षणबोधने श्लोकाः सन्ति । तानेवोदाहरति ।

इयं पराङ्मुखीभूय पतिं प्रत्यगवेक्षते ।
प्रेमप्रसन्नया दृष्ट्या ह्यस्या यौवनमागतम् ॥ १७ ॥

इयमिति । इयं पुरोदृश्यमाना काचिन्नायिका पराङ्मुखीभूय पतिसन्मुखं पृष्ठं कृत्वा प्रेमप्रसन्नया प्रेम्णो स्नेहेन प्रसन्ना मुदिता तया दृष्ट्या नेत्रेण पतिं स्वभर्त्तारं प्रत्यक्पृष्ठतो यथा तथाऽवेक्षते पश्यति अतोऽनेनैव लक्षणेनास्याः पुरोवर्तिन्या नायिकाया यौवनं तारुण्यं पत्या सह भोगक्षमं वय

इत्यर्थः, आगतमारूढमिति लक्ष्यते यथा तथेदमपि प्रकृते योज्यं तद्यथा, इयं पञ्चम्यारूढबुद्धिरियं प्रकृता पतिं पाति रक्षतीति पतिरात्मा स्वसत्सुखदानेन बुद्धिपालक इत्यर्थः, तं पराङ्मुखीभूयाहङ्कारादिशरीरान्तेषु सन्मुखत्वेन व्यवहारावस्थायामात्मानं पृष्ठतः कृत्वापि प्रेमप्रसनया दृष्ट्या प्रेम्णा निरतिशयस्नेहेनात्मविषयकस्नेहेनेत्यर्थः, प्रसन्ना रागादिहीनत्वेन निर्मला तया दृष्ट्या दृश्यत आत्माऽनया सा दृष्टिः प्रत्यगात्मविषयान्तःकरणवृत्तिस्तया पाति स्वमिति पतिरात्मा तं प्रत्यगन्तर्मुखं यथा तथाऽवेक्षतेऽवलोकयति यदा तदेत्यध्याहार्यं यदा यस्मिन्काले तदा तस्मिन्समये हि प्रसिद्धमस्या विवेकिनां दृश्यमानाया अहं ब्रह्मास्मीत्याकारप्रमावृत्तेर्यौवनं स्वात्मसुखानुभवसामर्थ्यवत्स्वरूपमागतं प्राप्तमिति ज्ञेयं, यद्वा स्वात्मना सह मिश्रणामिश्रणेनात्मानुसन्धानपूर्वकव्यवहारक्षमत्वं प्राप्तमित्यर्थः, युमिश्रणामिश्रणार्थकधातुप्रकृतिकत्वादिति भावः ॥१७॥

अन्यच्च लक्षणान्तरमपि दृष्टान्तदार्ष्टान्तिकोक्त्याह ।

न खेलति वयस्याभिः शिथिला गृहकर्मणि ।
रहः पश्यति चिन्हानि प्राप्ता प्राणपतेः सुखम् ॥ १८॥

नेति। यदेत्यध्याहार्यं यदा यस्मिन्काल इयं नायिका वयस्याभिः क्रीडासहायाभिः समानवयस्काभिः कन्याभिः सह न खेलति न क्रीडति तथा गृहकर्मणि गृहस्य मन्दिरस्य कर्म लेपनसंमार्जनादिकं तस्मिञ्छिथिला मन्दा भवति तथा रह एकान्ते चिन्हानि यौवनलक्षणानि स्तनादीनि भोगजन्यानि नखरादीनि वा पश्यति अवलोकयति तदा तस्मिन्काले प्राणपतेः पत्युः सकाशात्सुखं शर्म प्राप्ता लब्धवतीति ज्ञायते, एवं पञ्चम्यारूढमतावपि योज्यं तथाहि, इयं पञ्चम्यारूढा बुद्धिर्यदा य-

स्मिन्काले वयस्याभिरात्मक्रीडासहायाभिः शान्तिदान्त्यादिभिः समानवृत्तिरूपसखीभिः सह प्रयोजनाभिज्ञौ ताभिः सहक्रीडाया निष्फलत्वान्न खेलति न क्रीडति तथा गृहकर्मणि गृह्यते स्वात्मतयाङ्गीक्रियत इति गृहं शरीरं तस्य कर्म स्ववर्णाश्रमविहितक्रिया वैदिकं लौकिकं च भोजनादिकं तस्मिञ्छिथिलाहङ्कारस्य बाधितत्वान्मन्दं मन्दं प्रवर्त्तमाना भवति ग्रहकर्मणीति पाठे ग्रहा इन्द्रियाणि तेषां कर्माणि श्रवणादीनि तेषु जातित्वादेकवचनं शिथिला 'नान्योतोस्ति द्रष्टे'त्यादि श्रुत्याऽऽत्मनः पृथक्त्वस्य द्रष्टृत्वादिषु बाधितत्वादनादरवतीत्यर्थः। नायिका पक्षे तु ग्रहेति पाठे ग्रहाणामिन्द्रियाणां यत्कर्म वचनादानादि कर्मेन्द्रियाणां अन्यवार्त्ताश्रवणादि ज्ञानेन्द्रियाणां तस्मिञ्छिथिला पतिसंभोगसुखानुसन्धाने सक्ततया मन्दादरेत्यर्थः, तया रह एकान्ते स्थित्वेति शेषः, चिन्हानि स्वात्मनि स्थैर्यास्थैर्यन्यूनत्वाधिकत्वादिलक्षणानि स्वात्मनो वा लक्षणानि सच्चिदानन्दादीनि पश्यति साक्षादनुभवति तदा तस्मिन्काले प्राणपतेः प्राणस्य बुद्धेर्जीवनस्य पतिः पालक आत्मा तस्य सुखमानन्दं प्राप्ता लब्धेति ज्ञेया, एतदपि पञ्चम्या लक्षणं ज्ञेयम् ॥ १८ ॥

ननु शारीरः 'सन्न्यासादिवेषः सन्यासयोगादि'त्यादिश्रुतिषु श्रूयते तत्कुतस्तत्कर्मण्यनादरो ज्ञानिबुद्धेरित्याशङ्क्याह।

न वेषो विहितः कश्चिन्न वा वचनचातुरी।

किन्तु प्रेमातिसातत्याद्बालया लालितो हरिः ॥१९॥

न वेष इति। बालया राधया कश्चित्कोपि वेषः शृङ्गारो न विहितो हरिप्रीत्यर्थं न धृतस्तथा वचनचातुरी वचनानां वाक्यानां चातुरी कुशलता न विहिता न कृतेत्यर्थः, किन्तु किं तर्हि कृतमित्याशङ्कायामाह प्रेमेति, प्रेमातिसातत्यात्प्रेम्णः स्नेह-

स्यातिसातत्यं नैरन्तर्यं सन्ततप्रवाहवत्त्वं तस्मादेव केवलं तया राधया हरिर्भक्तदुःखहरणशीलः श्रीकृष्णो लालितः क्रीडितो वशीकृत इत्यर्थः, अतः शरीरवेषेण पाण्डित्येन वा न भगवान्वशीभवति किन्तु प्रेम्णैव केवलं वशः स्यादिति भावः, प्रकृतेपीदं योज्यं तद्यथा, बालया बालः केशस्तद्वदतिसूक्ष्मया 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरि'ति श्रुतेः पञ्चम्यारूढबुद्ध्या वेषः संन्यासादिः कश्चित्कोपि न विहित आत्मसाक्षात्काराय न धृतस्तथा वचनचातुरी वचनानां वाक्यानां चातुरी पाण्डित्यं न वा नैव कृता किन्तु किं तर्हि कृतमित्यपेक्षायामाह प्रेमेति, प्रेमातिसातत्यात्प्रेम्णः निरतिशयस्नेहस्यातिसातत्यं निरन्तरप्रवाहस्तस्मादेव कारणात्केवलं तया बुद्ध्या हरिर्हरति सर्वं द्वैतमिति हरिरात्मा लालितो वशीकृतोऽतो नाश्रमवेषपाण्डित्यादिकमात्मज्ञाने हेतुरिति भावः ॥ १९ ॥

अत एवालङ्कारादीनां स्वरूपप्राप्त्यभावे वैयर्थ्यमेवेत्याह ।

नालङ्कृता नो कुलीना न विदग्धा न सुन्दरी ।
यस्यां तु रमते स्वामी सा सौभाग्यवती वधूः ॥ २० ॥

नेति । वधूः स्त्री 'वधूर्जाया स्नुषा स्त्री चे'त्यनेकार्थः, अलङ्कृता भूषणैर्भूषितापि पत्या सह रमणाभावान्न सौभाग्यवती सौभाग्यं पतिभोगपुत्रादिजन्यं सुखं विद्यते यस्यां सा तादृशी नैव भवति अलङ्कृतायामपि विधवायां व्यभिचारेण पुरुषभोगजन्यसुखे सत्यपि पुत्रजन्यसुखाभावान्न सौभाग्यवत्त्वं व्यभिचाररहितायाश्च तस्यामुभयाभावात्तदभावः प्रसिद्ध एव सधवायां चालङ्कृतायां सत्यामपि पत्युः प्रेमाभावेन तत्र तद्रमणाभावान्न सौभाग्यवत्त्वमुभयत्रोभयप्रेमाभावे च परस्पर-

भोगेनापि तदभावः प्रसिद्ध एव, अतः स्वामी तु पतिरेव यस्यां भार्यायां तत्प्रेम्णा वशीकृतः सन्रमते क्रीडति सा सौभाग्यवती सौभाग्यं पतिपुत्रादिजन्यं सुखं विद्यते यस्यां सा तादृश्य-स्त्रीति ज्ञेया, तथा कुलीना सत्कुलभवा श्रेष्ठकुलोद्भवेत्यर्थः, न सौभाग्यवती न सौभाग्यसम्पन्ना भवति तथा सुन्दरी सुरूपा वधूः स्त्री न सौभाग्यवती नैव सौभाग्यसंपन्ना भवति तथा विदग्धा चतुरी स्त्री न सौभाग्यवती भवति यस्यां त्विति व्याख्यातं तत्सर्वत्रैव योज्यं, तस्मादलङ्कारकुलवैदग्ध्यसुन्दरत्वादयो गुणा न सौभाग्ये हेतवो भवन्ति किन्तु प्रियस्नेहेन स्वस्मिंस्तद्रमणमेव सौभाग्यकारणमिति भावः, एवं प्रकृतेपि योज्यं तद्यथा, वधयति बन्धयतीति वधूर्बुद्धिः सालङ्कृता शृङ्गारादिरसज्ञानवती संन्यासादिवेषपूर्वं शान्त्यादिवृत्तिभिर्वा भूषितापि न सौ-भाग्यवती सु शोभनं भगमैश्वर्यादिषट्कं तद्विद्यते यस्यां सा त-थोक्ता षडैश्वर्यवती मुक्ता न नैव भवति लोके तद्वत्त्वेपि तद्वत्त्वा-भावदर्शनात्तथा वधूर्बुद्धिः कुलीना कौ क्षेत्रे लीना नष्टा क्षेत्रा-कारत्वान्नष्टेत्यर्थः, यद्वा श्रेष्ठकुलजत्वाभिमानवती न सौभाग्य-वती सौभाग्यसम्पन्ना मुक्तत्वेन षडैश्वर्यवती न भवतीत्यर्थः, तथा विदग्धा लौकिकपाण्डित्यादिगुणवत्यपि वधूर्बुद्धिर्न सौभाग्यवतीति पूर्ववत्तथा सुन्दरी निर्मलत्वेन सुन्दरत्वाभिमानेन वा युक्तापि वधूर्बुद्धिर्न सौभाग्यवती भवति तर्हि का सौभा-ग्यवतीत्यपेक्षायामाह यस्यां त्विति स्वामी बुद्धिपालकः सच्चि-दानन्ददानेन बुद्धिसाक्षी कूटस्थस्तुपदेन बुद्धेर्विलक्षणत्वमा-त्मनः सूचितं, यस्यां बुद्धितो वैलक्षण्येन निरतिशयस्नेहवत्यां बुद्धौ रमते सहजसुखरूपेणाविर्भवति सा वधूरत्रावर्तनीयं वा-क्यभेदात्सा वधयति हिंसति सर्वं द्वैतमिति वधूर्बुद्धिरद्वैतात्मा-

कारा मतिः सौभाग्यवती षड्गुणैश्वर्यवती मुक्ता नित्यतृप्तिमती-त्यर्थः, भवति तस्मादात्मसुखाविर्भावाभावेऽलङ्कारादिकं सर्वं व्यर्थमेवेति भावः ॥ २० ॥

स्वरूपसुखानुभवं विना स्वरूपज्ञानाभावे दृष्टान्तमाह ।

यस्मिन्देशे सिता नास्ति तद्देश्यो वेत्ति किं सिताम् ।
स एव वेद माधुर्यं येनैवास्वादिता सिता ॥ २१ ॥

यस्मिन्निति । यस्मिन्देशे यत्र जनपदे सिता खण्डं नास्ति न-विद्यते तद्देश्यस्तस्मिन्देशे भवः पुरुषः सितां खण्डं वेत्ति किं जा-नाति किं नैव जानातीत्यर्थः, तर्हि को जानाति तमाह स ए-वेति, येनैव पुरुषेण सिता खण्डमास्वादिता भक्षिता स एव ख-ण्डास्वादक एव नान्यो माधुर्यं मधुरतां वेद जानाति यथा तथा-त्मसुखाननुभवी नात्मसुखं वेत्ति तदनुभव्येवात्मसाक्षात्कार-वानिति भावः ॥ २१ ॥

पुनश्च पञ्चम्यारूढलक्षणमाह ।

तृष्णां विहाय तुच्छेभ्यो मुनिर्निःशल्यतां गतः ।
स्वरसायनतृप्तात्मा दिनानुदिनमेधते ॥ २२ ॥

तृष्णामिति । मुनिर्मननवान्पञ्चम्यारूढः पुरुषस्तुच्छेभ्य-स्तुच्छान्विषयान्भोक्तुं या तृष्णेच्छा तां विहाय परित्यज्य निः-शल्यतामन्तर्वासनाः शल्यमिव दुःखहेतुत्वाच्छल्यं तन्निर्गतं यस्मा-त्सनिःशल्यस्तस्य भावस्तत्ता तां गतः प्राप्तः सन्स्वरसायनतृप्ता-त्मा स्वमात्मरूपं रसानां मानुषानन्दादिहिरण्यगर्भानन्दान्तानां सुखानामयनं स्थानं लयाधारं वा सनत्कुमारेण नारदायोक्तं छान्दोग्ये 'यो वै भूमा तत्सुखमि'ति श्रुत्या भूमाशब्दवाच्यमा-त्मसुखं तेन तृप्तः सुखित आत्माऽन्तःकरणं यस्य स तथाभूतः

सन् दिनानुदिनं पूर्वपूर्वदिनादुत्तरोत्तरदिन इत्यर्थः, इदं चोपलक्षणं लवक्षणादेरित्यर्थः, एधते वर्धते । इदमपि पञ्चम्यारूढलक्षणं ज्ञेयम् ॥ २२ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ भूमिकाभेदभास्करार्थप्रकाशे ज्ञानपञ्चमभूमिकानिर्णयार्थप्रकाशः षष्ठः ॥ ६ ॥

एवं पञ्चमभूमिकां सलक्षणां सविस्तरां निरूप्येदानी नवश्लोकां षष्ठीं भूमिकां निर्णेतुमाह ।

अथ षष्ठी भूमिका ।

अथेति । अथ पञ्चमभूमिकानिरूपणानन्तरं षष्ठी षष्ठी भूमिका निरूप्यते इति शेषः, सहेतुकं तज्जन्माह ।

भूमिकापञ्चकाभ्यासात्पदार्थाऽभाविनी भवेत् ।
षष्ठी घनसुषुप्तिः स्यान्महादीक्षेति सा भवेत् ॥१॥

भूमिकेति । भूमिकापञ्चकाभ्यासाद्भूमिकानामुक्तलक्षणानां पञ्चकं तस्याभ्यासस्तत्र तत्र चेतसः स्थिरीकरणं तस्माद्धेतोः षष्ठी भूमिका पदार्थाभाविनी पदानि नामानि अर्था रूपाणि तेषामभावो विद्यते यस्यां सा तथोक्ता नामरूपपारमार्थिकास्फुरणवतीत्यर्थः, भवेत्स्यात्तस्या नामान्तरैः सहोत्पत्तिं निरूपयति सार्धेन घनेति, सा सैवेत्यर्थः, घनसुषुप्तिर्घना पदार्थास्फुरणेन निविडा सुषुप्तिर्निद्रानाम्नी स्याद्भवेत्तथा सा सैव षष्ठी भूमिका महादीक्षा महती दीक्षाऽज्ञत्वनिरासेन ज्ञानित्वसंस्काररूपा यस्यां सा तथोक्तैतन्नाम्नी सा स्याद्भवेव ॥ १ ॥

महानिद्रेति सा प्रोक्ता यस्यामानन्दघूर्णिता ।

पदार्थविस्मृतिः सैव प्रोक्ता परिणतिश्च सा ॥ २॥

महानिद्रेति । सा षष्ठी भूमिका महानिद्रेति, पञ्चम्याः शिथिलनिद्रात्वापेक्षया महती गाढात्यन्तविषयाऽस्फूर्त्या सुषुप्तिर्महानिद्रेति नाम्नी प्रोक्ता कथिता ग्रन्थान्तर इति शेषः, तथा यस्यां षष्ठभूमिकायामानन्दघूर्णिताऽऽनन्दस्य सुखस्य घूर्णिता व्याप्तिरस्ति आनन्दमात्रस्फूर्त्या सर्वदुःखास्फूर्तिस्तस्यां भवतीत्यर्थः, । तथा सैव षष्ठभूमिकैव पदार्थविस्मृतिः पदानि नामानि अर्था रूपाणि तेषां विस्मृतिरभानं यस्यां सा तथोक्तैतन्नाम्नी भवेत्सा च षष्ठी भूमिकैव परिणतिरात्मनि परिणामात्परितिनाम्नी प्रोक्ता कथिता मुनिभिरिति शेषः ॥ २ ॥

तल्लक्षणानि वक्तुमाह ।

तल्लक्षणानि ।

तदिति । तल्लक्षणानि तस्याः षष्ठभूमिकाया लक्षणानि चिह्नानि उच्यन्ते इति शेषः, तान्येवाह सप्तभिः ।

नरवाहनसंरूढाः सुप्ता एव यथा नृपाः ।
चलन्ति तद्वत्स्वानन्दे सुप्त एव चलत्यसौ ॥ ३ ॥

नरेति । सुप्ता एवं निद्रिता एव नरवाहनसंरूढा नरैरुह्यते प्राप्यते देशान्तर इति नरवाहनं शिविकादिकं तस्मिन्संरूढा आरूढा नृपा राजानो यथा चलन्ति गच्छन्ति अगच्छति राज्ञि यथा गमनं व्यवह्रियते तद्वत्तथाऽसौ षष्ठ्यारूढः पुरुषः स्वानन्दे भूमानन्दे स्थित्वा प्रपञ्चे सुप्तः सन्निद्रित एव नराद्यभिधे शरीरे स्थितः सन्नहङ्कारादिभिः कृत्वा चलतीत्युपलक्षणं व्याप्नोतीत्यर्थः, इदं च षष्ठ्यारूढलक्षणं ज्ञेयम् ॥ ३ ॥

अन्यदपि लक्षणमाह ।

ध्यानाध्वरविधौ यस्य पशवश्चक्षुरादयः ।
स्वयमेवोपतिष्ठन्ति रन्तिदेवमखे यथा ॥ ४ ॥

ध्यानेति । यथा यद्वद्रन्तिदेवमखे रन्तिदेवस्य राज्ञो मखे पशव अज्ञाः स्वयमेवोपस्थिताः, एतच्च पुराणेषु प्रसिद्धम् । रन्तिदेवनामा राजेक्ष्वाकुवंशोद्भवः कश्चिद्दयाशीलस्तं ऋषयो यज्ञैर्याजयितुं प्रवृत्तास्तेन च तन्नाङ्गीकृतं हिंसाभयात्तदा ब्राह्मणैस्तव हिंसा न स्याद्यथा तथा कुर्म इति प्रतिज्ञाय ततो ब्राह्मणैः स्वयमेव पशवः पशुवधार्थमभिमन्त्रिते शस्त्रे स्वस्वशिरो यथा च्छेत्स्यन्ति तथाभिमन्त्रितास्तैश्च ततः स्वयमेव स्वस्वशिरांसि च्छित्वा तत्तद्देवताभ्यः स्वस्वशरीराण्यर्पितानीति तथा यस्य षष्ठ्यारूढस्य पुरुषस्य ध्यानाध्वरविधौ ध्यानमात्मचिन्तनं तदेवाध्वरो यज्ञस्तस्य विधिर्विधानं क्रिया तस्मिंश्चक्षुरादयश्चक्षुर्नेत्रगोलकस्थं रूपज्ञानसाधनमिन्द्रियं तदादि येषां ते पशवो बहिर्मुखत्वात्पशव इव पशवः स्वयमेव मद्याहारादि प्रयत्नं विनैवोपतिष्ठन्ति स्वस्वदेवतासु दिगादिषु लीना भवन्तीत्यर्थः, 'गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु' इति श्रुतेः, इदमपि षष्ठी लक्षणं ज्ञेयम् ॥ ४ ॥

अन्यदप्याह ।

पूर्णे बोधे समुत्पन्ने मनोबुद्धीन्द्रियादयः ।
अपूर्णाः पूर्णतां यान्ति का वाच्या तस्य पूर्णता ॥ ५ ॥

पूर्ण इति । मनोबुद्धीन्द्रियादयो मनश्च संशयात्मिकान्तःकरणवृत्तिरूपं बुद्धिश्च निश्चयात्मिकान्तःकरणवृत्तिरूपा—इन्द्रियाणि श्रोत्रादीनि शब्दादिज्ञानकरणानि कर्णादिगोलकस्थानि तानि आदीनि येषां देहादीनां ते सर्वे प्याविद्यकत्वात्स्वतो-

ऽपूर्णा अपि पूर्णतां विद्यया ऽविद्यानाशे सति तेषामप्यात्मत्वा-त्पूर्णतामानन्दरूपत्वेनान्यसुखनिरपेक्षतां यान्ति प्राप्नुवन्ति कस्मिन्सतीत्यतआह पूर्ण इति, पूर्णे आनन्दघनत्वेन परिपूर्णे बोधे ज्ञाने समुत्पन्ने सम्यक्संशयविपर्ययरहितत्वेनोत्पन्न उदिते सति तर्हि तदा तस्य सर्वदा परिपूर्णस्यात्मत्वात्षष्ठ्यारूढस्य पुरुषस्य पूर्णे बोधे समुत्पन्ने सति पूर्णताऽऽनन्दघनान्यसुखनि-रपेक्षता का वाच्या किंकथनीया, इदं च षष्ठ्यारूढलक्षणं ज्ञेयम् ॥५॥

पुनरन्यल्लक्षणमाह ।

तत्सर्वममृतं तस्य यत्खादति पिबत्यपि ।
यत्र तिष्ठति सा काशी स जपो यत्प्रजल्पति ॥ ६ ॥

तदिति । स षष्ठ्यारूढः पुरुषः यदन्नादिकं खादति भक्षति यदपि जलादिकं पिबति प्राश्नाति तद्भक्ष्यं पेयं च सर्व-मपि सकलमपि तस्य षष्ठ्यारूढस्य ज्ञानिन इत्यर्थः, 'यदश्नाति तदस्य हविरि'ति श्रुत्या ज्ञानिनो ज्ञानयज्ञे भक्ष्यस्यैव हविष्ट्वप्र-तिपादनात्तस्य च यज्ञशिष्टत्वेन यज्ञशिष्टामृतभुज इति भगवता गीतायाममृतत्वप्रतिपादनाच्चामृतं भवति अमृतस्य च भोज-नेनामृतत्वप्राप्तिप्रसिद्धेर्ज्ञानिनश्च बाधितत्वेन खानपानयोरात्मदृ-ष्ट्यावलोकितयोर्भोक्तुरप्यात्मत्वान्मरणशून्यत्वेनामृतत्वं भक्ष्यस्य तद्भोजनेनामरत्वमप्यात्मनः प्रसिद्धमेवेति भावः, ननु च तस्य सर्वेषामिव मुक्त्यर्थं काश्यां गमनं विहितमेवातस्तत्कर्तव्यमेवेत्या-शङ्क्याह यत्रेति, स षष्ठ्यारूढो यत्र यस्मिन्स्थाने तिष्ठति व-सति सा तदेव स्थानं काशी वाराणसी जायत इति शेषः, तस्य षष्ठ्यारूढस्य ज्ञानित्वेन 'ब्रह्मविद्ब्रह्मैव भवती'ति श्रुतेः, 'क्षेत्रज्ञं चापि मां विद्धी'ति स्मृतेश्च, क्षेत्रज्ञस्य तत्साक्षिणश्चैकत्वप्रतिपा-दनाच्च साक्षिब्रह्मणोरेकत्वस्य सिद्धान्तितत्वादीश्वरत्वं तद्वास-

त्वेन तत्सङ्गेन चान्येषामपि ज्ञानप्राप्त्या मुक्तिहेतुत्वाज्ज्ञानिवासस्थानस्य काशीत्वमिति भावः, तथा स षष्ठ्यारूढो यल्लौकिकं वैदिकं वा प्रजल्पति सहजं भाषते स तत्सर्वमपि वचनजातं जपो भवति जपस्यान्तःकरणशुद्ध्या ज्ञानप्रदत्वप्रसिद्धेर्ज्ञानिभाषणस्यापि सर्वेषां स्वस्य चान्तःकरणशोधनेन विवेकजनकत्वेन साफल्याज्जपत्वमिति भावः ॥ ६ ॥

ननु ज्ञानिना तीर्थयात्रादिकं त्ववश्यं कर्त्तव्यमित्याशङ्क्याह ।

संचारस्तीर्थसंचारः समाधिः शयनं मुनेः ।
यं पश्यति स विश्वेशः शृणोत्युपनिषच्च सा ॥ ७ ॥

सञ्चार इति । तस्य षष्ठ्यारूढस्य ज्ञानिनः सञ्चारः स्वाभाविकं गमनं तीर्थसञ्चारस्तीर्थानां पुष्करादीनां शुद्धिकारणानां सञ्चारो गमनं भवति ज्ञानिनो ब्रह्मरूपत्वेनेश्वरत्वात्सर्वतीर्थानां चेश्वरचरणस्थितिकत्वप्रसिद्धेर्ज्ञानीश्वरचरणस्थिततीर्थानां गमनं ज्ञानिगमनेनैव भवतीति भावः, यद्वा ज्ञानिनाऽत्मसुखपरिपूर्णत्वेन निरपेक्षत्वाद् ।

'निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम् ।
अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभि'रिति ॥

श्रीभागवते ज्ञानिगमनानुगमनं स्वस्य भगवतैवोक्तमतो ज्ञानिगमने भगवच्चरणस्थितसर्वतीर्थसञ्चारः सम्भाव्य इति भावः, ननु तर्हि मा करोतु ज्ञानी तीर्थगमनं समाधिस्तु चित्तविक्षेपपरिहाराय कर्त्तव्य एव तस्येत्याशङ्क्याह समाधिरिति, मुनेर्मननवतः षष्ठ्यारूढस्य शयनं निद्रापि मननेनैव जाग्रदवस्थायां सर्वद्वैतजातस्य बाधितत्वाज्जाग्रतीवात्मसुखस्फूर्तेः सत्वाद्द्वैतास्फुरणस्यैव लोके समाधित्वप्रसिद्धेर्निद्रा समाधिर्भवति किं पुनर्ज्जाग्रत्स्वप्नसमाधीनां तस्य समाधित्वं भवतीति वक्तव्यमिति भावः, ननु ज्ञानिवासस्य वि-

श्वेश्वरनामाभावे तत्र कथं काशीत्वं तत्राह यमिति, ज्ञानी यं पटघटपृथिव्यादिकं यं यं पदार्थं पश्यति अवलोकयति स पदार्थो नामरूपयोर्बाधितत्वात्तद्दृष्टेरपि बाधितत्वाच्च स्वात्मनो विश्वेश्वररूपत्वेन सर्वत्र सर्वदैवावलोकनाद्विश्वेशो विश्वस्येश्वर आत्मा जगदीश्वरो भवति एवं च ज्ञानिनः सर्वत्र सर्वदैव विश्वेश्वरदर्शनात्तद्वासस्थानस्य काशीत्वं निःसन्देहं सम्भाव्यमिति भावः, ननु ज्ञानिनस्तूपनिषच्छ्रवणं विहितमतस्तत्कर्तव्यमेवेत्याशङ्क्याह शृणोतीति, ज्ञानी यां वाणीं लौकिकीं वैदिकीं तिरश्चां वा शृणोति अवधारयति सा चोपनिषदुप समीपे तस्मिन्तस्मिन्वाक्ये ध्वनौ वा तच्छ्रवणे तच्छ्रोतर्यपि निषण्णं त्रिपुटीनामरूपबाधपर्यवशेषेण स्थितं ब्रह्म यत्र सा तथोक्ता भवति ज्ञानिनः सर्वत्र मनुष्यादिपतङ्गन्तजाते तत्साक्षित्वेन ब्रह्मात्मन एव प्रतीतेर्ज्ञानिश्रोत्रगतशब्दमात्रस्योपनिषत्त्वमिति भावः ॥७॥

ननु तर्हि ज्ञानिनः सर्वत्रानादरेपि प्रेमलक्षणभक्तिस्तु कर्त्तव्यैव तेनेत्याशङ्क्याह ।

पीयते प्रेम पीयूषं श्लिष्यते परमा कला ।

भुज्यते परमानंदो योगिना न स भोगिना ॥ ८ ॥

पीयते इति । योगिना जीवब्रह्मैक्यज्ञानवता षष्ठ्यारूढपुरुषेण प्रेम पीयूषं प्रेमात्मविषयको निरतिशयस्नेहस्तदेव सुखरूपत्वेन नित्यतृप्तिहेतुत्वात्पीयूषमिव पीयूषममृतं पीयते भाश्यते 'सर्वं खल्विदं ब्रह्मे'ति श्रुतिदृष्ट्या नामरूपात्मकप्रपञ्चस्य सर्वशब्दवाच्यस्य बाधितत्वाल्लोकदृष्ट्या सर्वत्र यत्प्रेम पीयते तत्तद्दृष्ट्या ब्रह्मात्मविषयमेवेति सर्वदैव योगिनः प्रेमामृतसेवनं सिद्धमिति सम्भाव्यमिति भावः, ननु ब्रह्माकारा वृत्तिस्तु कर्तव्यैवेत्याशङ्क्याह श्लिष्यत इति, योगिना परमा कला परं कार्यकारणातीतं ब्रह्म

भाति साक्षादभिन्नतया विषयीकरोति सा परमा ब्रह्मविषया कला शुद्धसत्त्वान्तःकरणवृत्तिरहंब्रह्मास्मीत्येवं रूपा श्लिष्यत आलिङ्ग्यते यावद्वृत्तीनां सर्वविषयबाधेन ब्रह्मण एव शेषितत्वात्सर्ववृत्तीनां ब्रह्मविषतया ब्रह्माकारत्वाद्योगिनः षष्ठ्यारूढस्य ब्रह्माकारवृत्तिप्रवाहः सर्वदैव सिद्ध इति न तत्कर्तव्यता तस्येति भावः, ननु तर्हि ब्रह्मसुखानुभवस्तु कर्तव्य एवेत्याहशङ्क्याह भुज्यते इति, योगिना परमानन्दः परमो निरतिशय आनन्दः सुखं भुज्यतेऽनुभूयते सर्वसुखानां ब्रह्मप्रतिबिम्बत्वेन ब्रह्माभिन्नत्वान्नामरूपात्मकसर्वपदवाच्यस्य प्रपञ्चस्य बाधितत्वाच्च ज्ञानिना यत्सुखमनुभूयते तद्ब्रह्मसुखमेवेति षष्ठ्यारूढस्य सदैव परमानन्दानुभवान्नतत्प्रयासः पृथगपेक्षित इति भावः, भोगिषु तु तत्त्यागेन तत्कर्त्तव्यतादृढत्वाय तदभावमाह नेति, स परमानन्दो भोगिना भोग्यसत्त्वनिश्चयपूर्वकस्वभोक्तृसत्त्वप्रतीतिमता पुरुषेण न भुज्यते नैवानुभूयते तस्य तु प्रपञ्चसुखदुःखानुभव एव न ब्रह्मसुखानुभव इति भावः ॥ ८ ॥

ननु षष्ठ्यारूढस्य परमानन्दनिष्ठानुभवसत्त्वे किं लक्षणं तत्राह ।

संप्राप्ते परमानन्दे न शोचति गतं वयः ।
भूतं भवद्भविष्यच्च सर्वमानन्दतां गतम् ॥ ९ ॥

इति श्रीनरहरिकृतौ बोधसारे भूमिकाभेदभास्करे
ज्ञानषष्ठभूमिकानिर्णयः ॥ ७ ॥

सम्प्राप्त इति। षष्ठ्यारूढः पुरुषः परमानन्दे निरतिशयभूमाख्यसुखे सम्प्राप्ते लब्धे सति गतमतीतं वय आयुः सफलत्वात्तस्य न शोचति न धिक्करोति—इदमेकं चिन्हं, द्वितीयं त्वाह भूतमिति, भूतमतीतं जन्मादि भवद्वर्तमानं भविष्यच्च भाव्यमपि

सर्वं सुखदुःखादिकारणं फलभूतसुखदुःखाभ्यां सहानन्दतां सुखरूपतां गतं प्राप्तं न तु तस्य सुखदुःखादि किं चिदपि सत्त्वेन प्रतीयत इति भावः ॥ ९ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ भूमिकाभेदभास्करार्थप्रकाशे षष्ठीनिर्णयार्थप्रकाशः सप्तमः ॥ ७ ॥

एवं षष्ठीं सलक्षणां निरूप्येदानीं नवश्लोकां सप्तमीं निरूपयितुमाह अथेति।

अथ सप्तमी।

अथ षष्ठीनिरूपाणानन्तरं सप्तमी सप्तमी भूमिका निरूप्यते इति शेषः, तत्र तावत्षष्ठ्यारूढस्य षष्ठ्युल्लङ्घन पूर्वं सप्तमीप्राप्तिमाह।

ततः षष्ठीमतिक्रम्य तुरीयां याति सप्तमीम्।
महाकक्षेति सैवोक्ता सैव गूढसुषुप्तिका ॥ १ ॥

तत इति। ततः षष्ठ्यारोहणानन्तरं षष्ठीं पदार्थाभाविनीनाम्नीं भूमिकामतिक्रम्योल्लङ्घ्य योगी तुरीयां व्यावहारिकजाग्रदाद्यवस्थात्रयापेक्षया तुरीयां चतुर्थीं सर्वज्ञानभूमीनां तुर्यत्वापेक्षया तु तुरीयातुरीयां पूर्वज्ञानभूमिषट्कापेक्षया सप्तमीं याति प्राप्नोति। तस्या एव नामान्तराणि स्मारयति महाकक्षेति, सैव सप्तम्येव महाकक्षा महती निरावरणाऽऽत्मप्राप्तौ कक्षा द्वारभूताऽतो महाकक्षेत्येवं नाम्नी ग्रन्थान्तर उक्ता कथिता सैव सप्तम्येव गूढसुषुप्तिका गूढाऽऽच्छन्ना सुषुप्तिकाऽल्पसुषुप्तिर्यस्यां सा तथोक्ताऽतो गूढसुषुप्तिरितिनाम्नी ग्रन्थान्तर उक्ता कथिता ॥ १ ॥

सूचीपत्रम् ।

गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	६
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	०	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	४	०
भट्टीकाव्य ५ सर्ग	०	६	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
वार्तिकपाठः	०	४	०
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	४	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	४
उपसर्गवृत्ति	०	१	०

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १२	१२	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ३	३	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ५	५	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०
पातञ्जलदर्शनम् श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा । श्रीमदन्नंभट्टप्रणीता खण्डानि० ५	५	०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३	३	०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमसहितः खण्डे २	२	०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख० ३	३	०
[illegible] विरचिता ।	२	०